< षष्ठोऽङ्कः >



अभिज्ञानशाकुन्तलम्

(ABHIJÑĀNAŚĀKUNTALAM)



डॉ. वेद प्रकाश शास्त्री

षष्ठोऽङ्कः

(ततः प्रविशत्याकाशयानेन मिश्रकेशी)

मिश्रकेशी—णिब्वत्तिदं मए पज्जाअणिव्वत्तणिज्जं अच्छरातित्थसंदिट्टं ता जाव साहुजणस्स अहिसेअकालो भवे दाव संपदं इमस्स राएसिणो वुत्ततं पच्चक्खीकरिस्सं। णं मेणआसंबंधेन सरीरभूदा दाणिं मे सउंतला, तए अ दुहिदुणिमित्तं संदिट्टपूब्बह्मि। **[निर्वर्त्तितं मया पर्यायनिर्वर्त्तनीयमप्सरस्तीर्थसन्दिष्टं तद्यावत् साधुजनस्याभिषेककालो भवेत्, तावत् साम्प्रतमस्य राजर्षेर्वृत्तान्तं प्रत्यक्षीकरिष्यामि। ननु मेनकासम्बन्धेन शरीरभूतेदानीं मे शकुन्तला, तया च दुहितृनिमित्तं सन्दिष्टपूर्वास्मि।]**

(ततः=तदनन्तरम्, आकाशयानेन=आकाशगामिना यात्रासाधनेन, वायुयानेन, मिश्रकेशी=एतन्नाम्नी अप्सरा, प्रविशति=रङ्गे समायाति।)

मिश्रकेशी—मया=मिश्रकेश्या, पर्य्यायेण=क्रमेण, निर्वर्त्तनीयम्=समापनीयम्, पर्य्याय-निवर्तनीयम्, अप्सरस्तीर्थैः=अप्सरयोनिभिर्मेनकादिभिः, सन्दिष्टम्=उक्तम् (कुबेरस्य परिचर्य्यात्मकं कर्म्म ज्ञातमित्यर्थः), निवर्तितम्=समापितम्, तत्=तस्मात्, यावत्=यावत्कालपर्य्यन्तम्, साधु-जनस्य=कुबेरस्य, अभिषेककालः=स्नानसमयो भवेत्, तत्=तस्मात्, यावत्कालपर्यन्तम्, साम्प्रतम्=अधुना, अस्य राजर्षेः=दुष्यन्तस्य, वृत्तान्तम्=समाचारं वृत्तं वा, प्रत्यक्षीकरिष्यामि=लोचनगोचरी-करिष्यामि (साधुजनस्याभिषेककालोपस्थितौ तु मयापि तत्रैव गन्तव्यमिति भावः)। ननु=यस्मात् कारणात्, मेनकासम्बन्धेन=मेनकाकन्यात्वेन हेतुना, इदानीम्=अधुना, शकुन्तला मे शरीरभूता=शरीरवत् प्रेमास्पदीभूता, तया=मेनकया च, दुहितृनिमित्तं—दुहितुः=कन्यायाः शकुन्तलायाः, निमित्तम्=अर्थः, (शकुन्तलासमाश्वसनाय) पूर्वं सन्दिष्टा इति सन्दिष्टपूर्वा=पूर्वमादिष्टा अस्मि। (प्रत्याख्यानात् परं शकुन्तलानिमित्तं दुष्यन्तः किं करोति वा न वेति समाचारपरिज्ञानायोक्तपूर्वा अस्मि।)

(इसके पश्चात् व्योमयान से मिश्रकेशी का प्रवेश)

मिश्रकेशी—उस अप्सरातीर्थ का सम्पादनीय कार्य मैंने सम्पादित कर लिया है। इधर जब तक कुबेर (साधुओं) के स्नान का समय होता है तब तक मैं इस राजा की दशा देखूँगी। मेनका के सम्बन्ध से शकुन्तला मेरे लिए अपने अंग के समान प्रिय हो गई है और मेनका ने भी मुझे पहले ही अपनी कन्या के विषय में सचेत कर दिया था।

(Then enter in an aerial car (aeroplane) a nymph called Miśrakeśī)

Miśrakeśī—Attendence at Apsarāteertha, which has to be kept by us in rotation, so long as it is bathing time for sages, has been observed by me. Now therefore I shall see with my own eyes news of this royal sage. Through my relation with Menakā, Śakuntalā has become my very body. And by her, for the sake of her daughter I have already been asked to do something.

(समन्तादवलोक्य) किण्णु क्खु उवत्थिदुच्छवेवि दिअहे णिरुच्छवारंभं विअ एदं राअउलं दीसदि। अत्थि मे विहवो सव्वं पणिधाणेण जाणिदुं, किंतु सहीए मए आदरो माणइदव्वो। भोदु, इमाणं ज्जेव उज्जाणबालआणं पास्सपरिवत्तिणी भविअ तिरक्करिणीए विज्जाए पच्छण्णा उवलहिस्सं। [**किन्तु खलु उपस्थितोत्सवेऽपि दिवसे निरुत्सवारम्भमिव इदं राजकुलं दृश्यते। अस्ति मे विभवः सर्वं प्रणिधानेन ज्ञातुम्। किन्तु सख्या मया आदरो मानयितव्यः। भवतु, एषामेवोद्यानपालकानां पार्श्वपरिवर्त्तिनी भूत्वा तिरस्करिण्या विद्यया प्रच्छन्ना उपलप्स्ये।**] (इति नाट्येनावतीर्य स्थिता)

(ततः प्रविशति चूताङ्कुरमालोकयन्ती चेटी तत्पृष्ठे अपरा च)

(समन्ताद्=चतुर्दिक्षु, अवलोक्य=दृष्ट्वा) किन्नु इति वितर्के, खल्विति प्रश्ने, उपस्थितोत्सवेऽपि—उपस्थितः=सन्निहितः, उत्सवः=वसन्तोत्सवः, यत्र तस्मिन् उपस्थितोत्सवे अपि, दिवसे=माधवीयदिवसे, निरुत्सवारम्भम्—निर्=न विद्यते, उत्सवारम्भः=उत्सवप्रवृत्तिः, यस्मिन् तत् निरुत्सवारम्भम्, इव, इदम्=दृश्यमानम्, राजकुलम्=राजसदनम्, दृश्यते। सर्वं=वृत्तान्तम्, प्रणिधानेन=समाधिना (ध्यानेन वा), ज्ञातुम्=अवगन्तुम्, मे=मम, विभवः=सामर्थ्यमस्ति। किन्तु=तथापि, सख्याः=शकुन्तलायाः सम्बन्धे, आदरः=आदरेण कृतोऽनुरोधः, मया, मानयितव्यः=सम्मानेन रक्षणीयः, भवतु=तदेव भवतु, एषामेव, उद्यानपालकानाम्=उपवन-रक्षकानाम्, पार्श्वपरिवर्त्तिनी=निकटवर्त्तिनी, भूत्वा, तिरस्करिण्या=अदृश्यकारिण्या, विद्यया=मन्त्रेण, प्रच्छन्ना=अदृश्यदेहा सती, उपलप्स्ये=राजवृत्तान्तं ज्ञास्यामि। (इति=इत्युक्त्वा, नाट्येन= अभिनयेन, अवतीर्य=गगनतलादवतरणं कृत्वा, स्थिता= तिष्ठति।)

(ततः=तदनन्तरम्, चूताङ्कुरं=रसालमुकुलम्, आलोकयन्ती=पश्यन्ती, चेटी=काचित् राज्ञो गृहस्थिता दासी, तस्याः=उक्तायाश्चेट्याः, पृष्ठे=पश्चाद्भागे, अपरा=अन्या चेटी दासी च, प्रविशति।)

(चारों ओर देखकर) उत्सव का दिन उपस्थित होने पर भी यह राजभवन उत्सव शून्य-सा दिखायी दे रहा है। यद्यपि मैं ध्यान द्वारा सब कुछ जान लेने का सामर्थ्य रखती हूँ तथापि सखी के उस आदरयुक्त अनुरोध की भी तो रक्षा मुझे करनी चाहिए। अस्तु, इन उद्यान-रक्षिकों के पास जाकर अपनी तिरस्करिणी विद्या के प्रभाव से अदृश्य होकर राजा का वृत्तान्त जानूँगी। **(ऐसा कहकर आकाश से उतरने का अभिनय करती हुई बैठ जाती है।)**

(इसके पश्चात् आम्रमञ्जरी देखती हुई एक दासी तथा उसके पीछे दूसरी दासी का प्रवेश।)

(Looking around) Why indeed may it be that even in the festival day of the spring season, the palace appears as though void of any festive activities? I have power to ascertain all by means of meditation. But respect of my friend must be paid regard too by me. Well, standing near these very female gardeners, concealed by the veil of invisibility, I shall try to know about the king. *(Having acted descent, stands)*

(Then enter a maid servant gazing at the mango blossom, and another behind her)

प्रथमा—कथं उवत्थिदो महुमासो? [**कथमुपस्थितो मधुमासः ?**]

आतम्महरिअवेंटं उस्ससिअं विअ वसंतमासस्स।
दिट्टं चूअअंकुरअं छणमंगल्लं निअच्छामि॥ १॥

[आताम्रहरितवृन्तम् उच्छ्वसितमिव वसन्तमासस्य।
दृष्टं चूताङ्कुरकं क्षणमङ्गल्यं नियच्छामि॥ १॥]

द्वितीया—परहुदिए! किं एदं एआइणी मंतेसि? [**परभृतिके! किमेतदेकाकिनी मन्त्रयसे?**]

प्रथमा—महुअरिए! चूअकलिअं पेक्खिअ उम्मत्तिआ क्खु परहुदिआ होदि। [**मधुकरिके! चूतकलिकां प्रेक्ष्य उन्मत्ता खलु परभृत्तिका भवति।**]

प्रथमा—प्रथमा चेटी, कथमिति हर्षे, मधुमासः=चैत्रमासः, उपस्थितः=समागतः।

अन्वयः—आताम्रहरितवृन्तं मङ्गल्यं क्षणं दृष्टं चूताङ्कुरकं वसन्तमासस्य उच्छ्वसितमिव नियच्छामि॥ १॥

आताम्रेति। आताम्राणि=ईषल्लोहितवर्णानि, हरितानि=पलाशवर्णानि, च वृन्तानि=बन्धनानि, यस्य तत् आताम्रहरितवृन्तम्, मङ्गलाय=मङ्गलकार्य्याय, हितमिति मङ्गल्यम्, क्षणम्=उत्सवरूपम्, दृष्टम्=अवलोकितम्, चूताङ्कुरकम्=आम्रमुकुलम्, वसन्तमासस्य=चैत्रमासस्य, उच्छ्वसितं=जीवितमिव, नियच्छामि=निश्चिनोमि। अत्र क्रियोत्प्रेक्षा (वाच्याभावाभिमानिनी) आताम्रेत्यादि स्वभावोक्तिः। आर्य्या जातिः॥ १॥

भावार्थः—आताम्रहरितवृन्तं मङ्गलकार्य्याय हितम् उत्सवरूपम् अवलोकितं चूताङ्कुरकं (दृष्ट्वा) चैत्रमासस्य जीवितम् इव निश्चिनोमि॥ १॥

द्वितीया—परभृतिके=प्रथमचेट्या सम्बोधनम्, किमेतद्, एकाकिनी=स्वगतमेव, मन्त्रयसे=आलपसि?

प्रथमा—मधुरिके=द्वितीयचेट्या नाम, चूतकलिकाम्=आम्रमञ्जरीं, प्रेक्ष्य=अवलोक्य, खल्विति निश्चयेन, परभृतिका=कोकिला अहञ्च, उन्मत्ता=उल्लासिनी, भवति।

पहली दासी—अरे! क्या मधुमास (वसन्त) आ पहुँचा?

जिसका वृन्त कुछ उज्ज्वल, रक्ताभ तथा हरा है और जो उत्सव रूप मङ्गलकार्य में संग्रह करने योग्य है, ऐसे इस दृश्यमान आम्रमुकुल को मैं मधुमास का प्राण ही मानती हूँ॥ १॥

दूसरी—परभृतिके! तू अकेली यहाँ क्या सोच रही है?

पहली—मधुरिके! आम्रमञ्जरी को देखकर कोयल (मैं) मतवाली हो जाती है।

First—The blossom of the mango tree—a little red, green and pale, the all in all of the life of the vernal (of spring season) month. The auspicious of the season is really able for collection, I feel so. (1)

Second—Parbhritike! why are you muttering alone?

First—Madhurike! Parbhritika (the female cuckoo or I) becomes intoxicated at the sight of the mango bud.

द्वितीया—(सहर्षं त्वरया उपगम्य) कधं उवत्थिदो महुमासो ? [**कथमुपस्थितो मधुमासः ?**]

प्रथमा—महुअरिए ! तवावि एसो कालो मदविब्भमुग्गीदाणं । [**मधुकरिके! तवापि एष कालो मदविभ्रमोद्गीतानाम्।**]

द्वितीया—सहि ! अवलंबस्स मं, जाव अग्गपदे परिट्ठिदा भविअ चूअप्पसवं गेण्हिअ संपादेमि कामदेवस्स अच्चणं । [**सखि! अवलम्बस्व माम्, यावदग्रपदे परिस्थिता भूत्वा चूतप्रसवं गृहीत्वा सम्पादयामि कामदेवस्य अर्चनम्।**]

प्रथमा—जइ एव्वं, ता ममावि अद्धं अच्चणफलस्स । [**यदि एवम्, तन्ममाप्यर्द्धमर्च्चनफलस्य।**

द्वितीया—(सहर्षं=हर्षसहितं, त्वरया=क्षिप्रगत्या, उपगम्य=अन्तिके प्राप्य) कथमिति हर्षे, मधुमासः=वसन्तमासः, उपस्थितः=प्राप्तः ।

प्रथमा—मधुकरिके!—मधु=मधुवन्मधुरं वचनं पुष्पसारञ्च, करोतीति मधुकरी, तत्सम्बोधने हे मधुकरिके=भ्रमरि! चेटी च, तवापि=भ्रमर्य्याः अपि, पक्षे-तदाख्यचेट्याः अपि, मदविभ्रमेण=मत्तताविलासेन, उद्गीतानाम्=उच्चैःस्वरेण गानानाम्, एषः=प्रसिद्धः, वसन्ताख्यः कालः । एतेन मधुरिका वसन्तगीतिषु प्रावीण्यं प्रकटितम्।

द्वितीया—सखि ! माम् अवलम्बस्व=यथा न धराशायी भवामि तथा अवलम्बनं देहि। यावत्=यावता कालेन, अग्रपदे=पदयोरग्रे (अङ्गुलीमात्रसमाश्रयेणेति भावः), परिस्थिता=उन्नता भूत्वा, चूतप्रसवम्=आम्रमञ्जरीं, गृहीत्वा=अवचित्य, कामदेवस्य=स्मरस्य, अर्चनम्=पूजनम्, सम्पादयामि=निष्पादयामि।

प्रथमा—यद्येवं=मत्कृतावलम्बनेन, यदि चूतप्रसवग्रहणं करिष्यसि तदा, तत् अर्चनफलस्य=त्वत्कृतस्मरपूजनफलस्य, अर्द्धम्=एको भागः, ममापि भवेत्। (यदि तवार्चनफलस्यार्द्धभागिनी अहं भविष्यामि इति त्वमनुमन्यसे तदा त्वामहमवलम्बे इति भावः।)

दूसरी—(**हर्षपूर्वक शीघ्र पास आकर**) क्या मधुमास आ गया ?

पहली—मधुरिके ! मस्ती के साथ गाने का तुम्हारा (कोयल का) भी तो यही समय है।

दूसरी—सखी ! जरा मुझे सँभालो, जिससे मैं पाँवों की अँगुलियों (पंजे) के बल खड़ी होकर आम की मञ्जरी तोड़ लूँ और उससे कामदेव का पूजन करूँ।

पहली—यदि ऐसा है तो उस पूजन का आधा फल मुझे भी मिलना चाहिए।

Second—*(Joyfully approaching with haste)* What! has the spring month arrived?

First—Madhurike (the female bee)! Here now is your time for your intoxicated graceful songs.

Second—Friend! support me, till·standing on the tips of my feet, I pluck the mango-but and perform the worship of cupid (Kāma).

First—If mine too would be half of the fruit of the worship.

द्वितीया—सहि! अभणिदे वि एदं संपज्जइ एव्व। जदो एक्कं ज्जेव णो एदं सरीरं द्विधा भिण्णं पजावइणा। (सखीमवलम्ब्य चूतप्रसवं गृहीत्वा) अम्महे! अप्पवुद्धो वि चूअप्पसवो वंधणभंगसुरही राअदि। (कपोतहस्तं कृत्वा) णमो भअवदे मअरद्धजाअ। [सखि! अभणितेऽपि एतत् सम्पद्यत एव। यत् एकमेव नौ एतत् शरीरं द्विधा भिन्नं प्रजापतिना। अहो! अप्रबुद्धोऽपि चूतप्रसवो बन्धनभङ्गसुरभी राजते। नमो भगवते मकरध्वजाय।]

अरिहसि मे चूअंगुर! दिण्णो कामस्स गहिदचावस्स।
पहिअजणजुअइलक्खो पंचंतरिओ सरो होदुं॥ २॥

[अर्हसि मे चूताङ्कुर! दत्तः कामस्य गृहीतचापस्य।
पथिकजनयुवतिलक्ष्यः पञ्चान्तरितः शरो भवितुम्॥ २॥]

द्वितीया—सखि! अभणितेऽपि=मया अनाख्यातेऽपि, एतत् मयार्चनफलस्यार्द्धभागम्, सम्पद्यत एव=तव भवत्येव। यतः-यस्मात् एकमेव=अभिन्नमेव, नौ-अस्माकम् शरीरम्-देहः, प्रजापतिना-विधात्राद्विधा भिन्नम्=द्विधा कृतम्। (सखीम्=परभृतिकानाम्नीम्, अवलम्ब्य=आश्रयं गृहीत्वा, चूतप्रसवम्=आम्रमञ्जरीम्, गृहीत्वा) अहो=इत्याश्चर्ये, अप्रबुद्धोऽपि=अप्रस्फुटितोऽपि, चूतप्रसवः=आम्रमञ्जरी, बन्धनभङ्गेन सुरभिः=वृन्तत्रोटनेन सुगन्धिः, राजते=शोभते (अप्रतिबोध-दशायामपि बन्धनभङ्गमात्रेण ईदृशसौरभोद्गमे प्रतिबोधकाले तु किं वा न भविष्यतीति भावः)

(कपोतहस्तं कृत्वा=करयोः कपोताकारमञ्जलिं विधाय) नमो भगवते मकरध्वजाय=स्मराय, सर्वशक्तिसम्पन्नाय कामदेवाय नमः। अर्चनमन्त्रोऽयम्।

अन्वयः—हे चूताङ्कुर! मे दत्तः पथिकजनं युवतिलक्षः, पञ्चान्तरितः गृहीतचापस्य कामस्य शरो भवितुम् अर्हसि॥ २॥

अर्हसीति। हे चूताङ्कुर=हे आम्रमुकुल! मे=मया, दत्तः=स्मरमुद्दिश्योत्सृष्टः त्वम्, पथिक-

---

दूसरी—यदि तुम न कहती तब भी ऐसा ही होता (पूजा के फल का आधा भाग तुम्हें ही मिलता) क्योंकि ब्रह्मा नें हम दोनों के एक ही शरीर को दो भागों में बाँट दिया है। (**सखी के सहारे से मञ्जरी तोड़कर**) अहो! यद्यपि अभी यह मञ्जरी विकसित नहीं हुई है तथापि वृन्त से अलग होते ही सुगन्ध फैला रही है। (**अञ्जली बाँधकर**) भगवान् कामदेव को नमस्कार है।

हे आम्रमुकुल! मेरे द्वारा कामदेव के प्रति समर्पित तुम धनुर्धारी कामदेव के पाँच बाणों में से एक बाण बन कर विरहीजनों की युवतियों को अपना लक्ष्य बनाओ॥ २॥

Second— This happens even when not told. For our life is one, though the body is divided in two parts. *(Leaning on her friend and plucking the mango blossom)* Oh! the mango blossom though not fully blown, spreading fragrance here owing to the cutting of the stalk. *(Folding the hands so as to form a hollow)* Respectful salutation to God cupid.

You have been, mango-blossom! given by me to kāma (cupid), who has taken up his bow, with the young wives of the

कञ्चुकी—(प्रविश्य अपटीक्षेपेण सक्रोधम्।) मा तावदनात्मज्ञे! देवेन प्रतिषिद्धेऽपि मधूत्सवे चूतकलिकाभङ्गमारभसे।

उभे—(भीते) पसीददु पसीददु अज्जो, अगहिदत्था अम्हे। [**प्रसीदतु प्रसीदतु आर्यः, अगृहीतार्थे आवाम्।**]

जनानां=प्रोषितजनानां, युवतयः=वध्वः, लक्ष्याणि=शरव्याणि, यस्य सः पथिकजनयुवतिलक्ष्यः, पञ्चानां=पञ्चसंख्यकानाम् (सम्मोहनादीनाम्), शराणाम्, अन्तरितः=अन्तर्गतः पञ्चान्तरितः, गृहीतचापस्य=धृतधनुषः, कामस्य=स्मरस्य, शरो भवितुमर्हसि। अत्र आर्य्या जातिः ॥ २ ॥

भावार्थः—हे चूताङ्कुर! मया स्मरमुद्दिश्योत्सृष्टस्त्वं प्रोषितजनयुवतिलक्ष्यः (यस्य तादृशस्त्वम्) पञ्चसङ्ख्यकेभ्यः शरेभ्यः अभ्यधिकः अतिरिक्तः षष्ठः (शरः) धृतधनुषः कामस्य शरो भवितुमर्हसि ॥ २ ॥

कामस्य शराः सन्त्यधस्तनाः—

'सम्मोहनोन्मादनौ च शोषणस्तापनस्तथा। स्तम्भनश्चेति कामस्य पञ्च बाणाः प्रकीर्तिताः ॥
अरविन्दमशोकञ्च चूतञ्च नवमल्लिका। नीलोत्पलञ्च पञ्चैते पञ्चबाणस्य सायकाः ॥'

कञ्चुकी—(प्रविश्य=मञ्चे समागत्य, अपटीक्षेपेण=ससम्भ्रम्, सक्रोधम्=सकोपम्) राज्ञा वसन्तोत्सवे प्रतिषिद्धेऽपि चूताङ्कुरद्वारा कामपूजनमवलोक्य कथयति—मा तावद्=इति निषेधे, साम्प्रतमेवं मा कुरुतमित्यर्थः। हे अनात्मज्ञे=आत्मज्ञानविरहिते! देवेन=राज्ञा दुष्यन्तेन, मधूत्सवे=वसन्तोत्सवे, प्रतिषिद्धे=वारितेऽपि, चूतकलिकाभङ्गम्=आम्रमुकुलत्रोटनम्, आरभसे=करोषि।

उभे—(भीते=भयं नाटयन्त्यौ) आर्य्यः=भवान्, प्रसीदतु=प्रसन्नो भवतु, सम्भ्रमे द्विरुक्तिः, अगृहीतः अर्थः=राजकर्तृकमधूत्सवप्रतिषेधलक्षणविषयः, याभ्यां ते अगृहीतार्थे, आवाम्। (आवाभ्यां राजकृतमधूत्सवप्रतिषेधरूपार्थो न ज्ञातः। अत एवाज्ञानकृतापराधस्य मर्षणीयत्वाद् भवान् तं मर्षयतु इति भावः।)

कञ्चुकी—(**एकाएक आकर क्रोध के साथ**) अरी मूढो! ऐसा न करो। महाराज ने वसन्तोत्सव रोक दिया है फिर भी तुम आम की मञ्जरी तोड़ रही हो।

दोनों—(**भयभीत होकर**) आर्य प्रसन्न हों, हमें निषेधाज्ञा का ज्ञान नहीं था।

---

travelling folk as your target, be you an arrow superior to the usual five arrows of kāma. (2)

Chamberlain—*(Entering in anger with hurry)* Do not O' thoughtless girl! why do you begin the plucking of mango-buds, when the spring festival has been prohibited by his majesty?

Both—*(Frightened)* Pleased be your honour. We have not learnt the prohibition order.

कञ्चुकी—हुं, न किल श्रुतं भवतीभ्यां यद्वासन्तैस्तरुभिरपि देवस्य शासनं प्रमाणीकृतं तदाश्रयिभिश्च। तथाहि—

चूतानां चिरनिर्गतापि कलिका बध्नाति न स्वं रजः
सन्नद्धं यदपि स्थितं कुरुवकं तत् कोरकावस्थया।
कण्ठेषु स्खलितं गतेऽपि शिशिरे पुंस्कोकिलानां रुतं
शङ्के संहरति स्मरोऽपि चकितस्तूणार्द्धकृष्टं शरम्॥ ३॥

कञ्चुकी—हुम्=इति क्रोधे परिप्रश्ने वा, भवतीभ्यां=चेटीभ्याम्, किलेत्यसम्भावनायाम्, न श्रुतं=नाकर्णितम्, युवाभ्यां देवशासनं न श्रुतमित्येतदसम्भाव्यम् इत्याशयः। यत्=यस्मात्, वासन्तैः=वसन्तकालोद्भवैः, तरुभिः=वृक्षैरपि, तदाश्रयिभिः=वासन्ततर्वाश्रयिभिः पुंस्कोकिलादिभिश्च, देवस्य=राज्ञो दुष्यन्तस्य, शासनं=मधूत्सवप्रतिषेधाज्ञा, प्रमाणीकृतम्=पालितमेव। तथाहि—

अन्वयः—चिरनिर्गतापि चूतानां कलिका स्वं रजः न बध्नाति। यदपि कुरुवकं सन्नद्धं तदपि तत् कोरकावस्थया स्थितम्। तथा शिशिरे गतेऽपि पुंस्कोकिलानां रुतं कण्ठेषु स्खलितम्। स्मरोऽपि चकितः तूणात् अर्द्धकृष्टं शरं संहरति इति शङ्के॥ ३॥

चूतानामिति। चिरनिर्गतापि=बहुपूर्वं बहिर्गतापि, चूतानाम्=आम्राणाम्, कलिका=मञ्जरी, स्वं=स्वकीयम्, रजः=परागम्, न बध्नाति=नाविष्करोति। तथा च, यदपि, कुरुवकं=शोणकुरण्टकपुष्पमुकुलम्, सन्नद्धं=बहिर्निर्गतम्, तदपि=बहिर्निर्गमनवत्कुरुवकमुकुलमपि, तत्=कुरुवकम्, कोरकावस्थया=कलिकारूपेणैव, स्थितम्। तथा, शिशिरे=शिशिरर्तौ, गतेऽपि=अतीतेऽपि, वसन्ताविर्भावेऽपि, पुमांसश्च ते कोकिलाश्चेति तेषां पुंस्कोकिलानां=कोकिलयूनाम्, रुतं=शब्दितम्,

---

कञ्चुकी—हूँ, क्या तुम दोनों ने यह नहीं सुना कि वसन्तकाल के वृक्षों और उनके आश्रित पक्षियों तक ने महाराज की आज्ञा का पालन किया है। देखो—

मञ्जरी यद्यपि काफी समयपूर्व निकल गई है तथापि वह पराग नहीं धारण करती, कुरुबक कलिकारूप में ही बना रह गया, विकसित नहीं हुआ। शीतकाल बीत जाने पर भी पुंस्कोकिल छिपा बैठा है, कूकता नहीं। यह सब देखकर मैं सोचता हूँ कि कामदेव ने भी भयभीत होकर तरकस से आधा निकाला हुआ बाण फिर यथास्थान रख दिया है, चलाया नहीं॥ ३॥

Chamberlain—Indeed! have you not heard the command of his majesty, which has been considered authoritative even by the trees, that blossom in the spring and the birds, that resort to them. For—

The bud of mango trees, though long since come out, does not form its own pollen; that Kurbāka also, which is completly ready to blossom, remains in the state of a bud; the note of the male-cuckoos, even though the winter season has gone, falters (stumbles) in their throats; I fear even Kāma, being amazed, arrests his arrow half drawn from his quiver (arrow keeper). (4)

मिश्रकेशी—णत्थि एत्थ संदेहो, महाप्पहावो क्खु राएसी। [**नास्त्यत्र सन्देहः, महाप्रभावः खलु राजर्षिः।**]

प्रथमा—अज्ज! कदिचिद्दिअसाइं मित्तावसुणा रट्टिएण भट्टिणो पादमूलं पेसिदा अम्हे इध पमदवणे चित्तकम्म अप्पिदुं। ता आगंतुअदाए ण सुदपुव्वो अम्हेहिं एसो वुत्तंतो।[**आर्य! कतिचिद्दिवसानि मित्रावसुना राष्ट्रियेण भर्त्तुः पादमूलं प्रेषिते आवाम् इह प्रमदवने चित्रकर्म्म अर्पयितुम्, तदागन्तुकतया न श्रुतपूर्व आवाभ्यामेष वृत्तान्तः।**]

कञ्चुकी—तेन हि न पुनरेवं प्रवर्त्तितव्यम्।

कण्ठेषु=गलप्रदेशेषु एव, स्खलितं=निर्गमनकाले लीनम्। स्मरोऽपि=सर्वविजयी कामोऽपि, चकितः=राजशासनात् भीतः, सन्, तूणात्=तूणीरात्, अर्द्धकृष्टम्=अर्द्धनिष्कासितम्, शरम्=बाणम्, संहरति=पुनस्तूणीरे एव स्थापयति, इति शङ्के=इति सम्भावयामि। अत्रोत्प्रेक्षा वाक्यार्थहेतुकं काव्यलिङ्गञ्चालकारौ। शार्दूलविक्रीडितं वृत्तम्॥ ३॥

भावार्थः—यत्राचेतनैः स्थावरैः पादपैः विशिष्टचेतनैर्जङ्गमैः पक्ष्यादिभिस्ततोऽपि माहात्म्यवद्भिर्देवैरपि राजशासनं पाल्यते तत्र भवतीभ्यामेव राजशासनं न श्रुतम् इत्याश्चर्यजनकमेव मन्ये॥ ३॥

मिश्रकेशी—नास्त्यत्र सन्देहः=कञ्चुकीयोक्तं सर्वं सत्यमेवेत्यर्थः। महान् प्रभावो यस्य सः महाप्रभावः=प्रखरशक्तिसम्पन्नः, खल्विति निश्चयेन, राजर्षिः=महाराजो दुष्यन्तः।

प्रथमा—आर्य! इति कञ्चुकीयसम्बोधनम्, कतिचिद्दिवसानि=कियन्त्येवाहानि, मित्रावसुना=तन्नाम्ना, राष्ट्रियेण=राजश्यालेन (नगराध्यक्षेण), प्रमदवने=तन्नामकमहिलोद्याने (राज्ञोऽन्तःपुरोद्याने), चित्रकर्म्म अर्पयितुं=पटे चित्रं कारयितुं, भर्त्तुः=स्वामिनो दुष्यन्तस्य, पादमूलम्=चरणान्तिकम्, आवाम्=मधुकरिकापरभृतिके चेट्यौ, प्रेषिते=प्रेरिते। तत्=तस्मात्, आगन्तुकतया=नवागततया, आवाभ्याम्, न श्रुतपूर्वः=न पूर्वं श्रुतः, एषः वृत्तान्तः=वसन्तोत्सव-निषेधरूपः वृत्तान्तः।

मिश्रकेशी—इस (कञ्चुकी के कथन) में कोई सन्देह नहीं है; क्योंकि महाराज का प्रभाव महान् है।

पहली—आर्य! कई दिन पूर्व राजश्यालक मित्रावसु ने इस प्रमदोद्यान में चित्र बनाने के लिए हमलोगों को महाराज के पास भेजा था। अतएव यहाँ के लिए नई-नई आनेवाली हम दोनों ने यह वसन्तोत्सव निषेधाज्ञापरक वृत्तान्त नहीं सुना था।

कञ्चुकी—यदि ऐसा है, तो फिर कभी ऐसा न करना।

Miśrakeśī—There is no doubt. The royal sage is of great prowess.

First—Honorable sir, only a few days ago since Mitravasu, the king's brother-in-law, sent us near the feet of his majesty in this ladies garden to draw the portrait. So, being new commer to this place we both have not heard this news even before. i.e. the royal order for prohibition of spring function.

उभे—(सकौतूहलम्) अज्ज! जइ इमिणा जणेण सोदव्वं, ता कधेदु अज्जो किं णिमित्तं भट्टिणा वसंतुच्छवो पडिसिद्धोत्ति। **[आर्य! यद्यनेन जनेन श्रोतव्यम्, तत् कथयतु आर्यः किं निमित्तं भर्त्रा वसन्तोत्सवः प्रतिषिद्ध इति।]**

मिश्रकेशी—उच्छवप्पिआ क्खु राआणो होंति, ता एत्थ गुरुणा कारणेन होदव्वं। **[उत्सवप्रियाः खलु राजानो भवन्ति, तदत्र गुरुणा कारणेन भवितव्यम्।]**

कञ्चुकी—(स्वगतम्) बहुलीभूतोऽयमर्थः, तत् किं न कथ्यते। (प्रकाशम्) अस्ति भवत्योः कर्णपथमायातं शकुन्तलाप्रत्यादेशकौलीनम्?

कञ्चुकी—तेन=यद्येवं तर्हि, पुनः=भूयः, एवं=चूतकलिकाभङ्गादिभिरुत्सवारम्भेण, न प्रवर्तितव्यम्=न प्रवृत्तिर्विधेया।

उभे—(सकौतूहलम्=कौतूहलेन सह) आर्य!=मान्य! यदि अनेन जनेन=अस्मद्विधेन चेटीजनेन, श्रोतव्यम्=श्रवणार्हम्, तत्=तदा, आर्यः=मान्यः, कथयतु, किं निमित्तम्=केन हेतुना, वसन्तोत्सवः=मधूत्सवः (भर्त्रा दुष्यन्तेन), प्रतिषिद्धः=वारितः (इति कथयतु)।

मिश्रकेशी—खल्विति निश्चये, राजानः=भूपालाः, उत्सवः प्रियो येषान्ते उत्सवप्रियाः= इष्टोत्सवाः, भवन्ति, तत्=तस्मात्, अत्र=उत्सवनिषेधे, गुरुणा=महता, कारणेन=हेतुना, भवितव्यम्।

कञ्चुकी—(स्वगतम्=आत्मगतम्) अयमर्थः=वसन्तोत्सवनिषेधहेतुवृत्तान्तः, बहुली-भूतः=प्रायेण सर्वत्र व्याप्तः, तत्=तस्मात्, किं न कथ्यते=अनयोः सविधे कथं मया न प्रकाश्यते। (प्रकाशम्=सुस्पष्टम्) भवत्योः=युवयोः चेट्योः, कर्णपथमायातम्=श्रवणगोचरीभूतम्, शकुन्तला-प्रत्यादेशकौलीनम्—शकुन्तलायाः=कण्वदुहितुः, प्रत्यादेशस्य=निराकृतेः, कौलीनम्=लोकवादः, कर्णपथमायातं किम्? इति काक्वा पृच्छति।

दोनों—(कौतूहल के साथ) आर्य! यदि हमें बताने में कोई हानि न हो अथवा यदि हमारे सुनने योग्य हो तो कृपया बताइए कि यह वसन्तोत्सव रोक क्यों दिया गया?

मिश्रकेशी—राजा लोग तो उत्सवप्रिय होते हैं, अतः निश्चय ही इस निषेधाज्ञा का कोई विशेष कारण होगा?

कञ्चुकी—(स्वगत) जब यह बात फैल ही चुकी है तब इन्हें भी क्यों न बता दूँ? **(प्रकट)** क्या आप दोनों ने शकुन्तला के त्याग का लोकापवाद सुना है?

Chamberlain—All right. You should not again act in this way.

Both—*(With curiosity)* Respected sir, if it is fit to be heard by these persons, let your honour tell why has the spring festival been prohibited by his majesty?

Miśrakeśī—Kings, indeed are fond of festivals. There should be a great reason.

Chamberlain—*(To himself)* This has been wide spread, why should it not be told? *(Openly)* Has not the scandal of the repudiation of Śakuntalā crossed the range of your ears here?

उभे—अज्ज! सुदं रट्टिअमुहादो अंगुलीअदंसणं जाव। [आर्य! श्रुतं राष्ट्रियमुखात् अङ्गुरीयकदर्शनं यावत्।

कञ्चुकी—तेन स्वल्पं कथयितव्यम्। यदैवाङ्गुरीयदर्शनादनुस्मृतं देवेन सत्यमूढपूर्वा रहसि मया तत्रभवती शकुन्तला मोहात् प्रत्यादिष्टेति, तदाप्रभृत्येव पश्चात्तापमुपगतो देवः। तथा हि—

रम्यं द्वेष्टि यथा पुरा प्रकृतिभिर्न प्रत्यहं सेव्यते,
शय्योपान्तविवर्त्तनैर्विगमयत्युन्निद्र एव क्षपाः।
दाक्षिण्येन ददाति वाचमुचितामन्तःपुरेभ्यो यदा
गोत्रेषु स्खलितस्तदा भवति च व्रीडावनम्रश्चिरम्॥ ४॥

उभे—आर्य=मान्य! राष्ट्रियस्य=राजश्यालकमित्रावसोर्मुखात्, श्रुतम्=आकर्णितम्, अङ्गुरीयकदर्शनं यावत्=अङ्गुलिमुद्रादर्शनावधि धीवरालब्धेति शेषः।

कञ्चुकी—तेन हि=बहुतरांशस्य श्रुतत्वादेव, स्वल्पम्=अवशिष्टवृत्तभागमात्रम्, कथयितव्यम्=वक्तव्यविषयस्याल्पमात्रावशेषोऽस्तीत्यर्थः। रहसि=एकान्ते, निर्जनवनप्रदेशे, ऊढपूर्वा=गान्धर्वविधिना परिणीतपूर्वा, तत्रभवती=मान्या शकुन्तला, किन्तु मोहात्=विस्मरणात्, प्रत्यादिष्टा='न त्वं मे पत्नी' इत्यादिकथनेन निराकृता, इति देवेन=राज्ञा दुष्यन्तेन, यदैव अङ्गुरीयकदर्शनाद्धेतोरनुस्मृतम्, तदाप्रभृत्येव=तदारभ्यैव, देवः=राजा दुष्यन्तः, पश्चात्तापम्=अनुतापम्, उपगतः=प्राप्तवान्। तथाहि—

अन्वयः—देवः रम्यं द्वेष्टि यथा पुरा प्रकृतिभिः प्रत्यहं न सेव्यते। उन्निद्रः शय्योपान्त-

---

दोनों—आर्य! हमने नगराध्यक्ष से महाराज द्वारा अँगूठी देखने तक का वृत्तान्त सुना है।

कञ्चुकी—तब तो अधिकांश वृत्तान्त भाग जान लेने के कारण शेष थोड़ा ही भाग बताना है। अँगूठी देखकर जैसे ही महाराज को स्मरण आया कि सत्य ही मैंने एकान्त में शकुन्तला के साथ विवाह किया था और अब अज्ञानवश उसका अपमान कर बैठा हूँ तभी से उन्हें अतीव पश्चात्ताप हो रहा है। क्योंकि—

महाराज अब रम्य वस्तु देखकर उससे घृणा करते हैं। पहले की भाँति अमात्यादि की सेवा स्वीकार नहीं करते। शय्या पर लेटकर सोते नहीं बल्कि करवटें बदलते हुए रात बिता

Both—We have heard this incident from the mouth of the royal brother-in-law as for as the seeing of the ring.

Chamberlain—Then, a little is to be told. Just when, at the sight of his own ring his majesty recollected that really Śakuntalā was married by him before in secret and was repudiated through (foolishness) infatuation, his majesty has been subject to repentance (sorrow). For—

He hates the delightful, he is not daily waited upon by ministers as before, he passes the nights altogather without sleep in

मिश्रकेशी—पिअं मे पिअं। **[प्रियं मे प्रियम्।]**

कञ्चुकी—अस्मात् प्रभवतो वैमनस्यादुत्सवः प्रत्याख्यातः।

विवर्तनैः एव क्षपाः विगमयति। यदा दाक्षिण्येन अन्तःपुरेभ्यः उचितां वाचं ददाति तदा गोत्रेषु स्खलितः चिरं क्रीडावनम्रः भवति॥ ४॥

रम्यमिति। देवः=राजा दुष्यन्तः, रम्यं=रमणीयं वस्तु, द्वेष्टि=नाभिनन्दति, यथा पुरा=पूर्ववत्, प्रकृतिभिः=अमात्यादिभिः, प्रत्यहम्=अनुदिनम्, न सेव्यते=राजकार्यसम्पादनार्थं नोपास्यते (राजकार्यं सम्यक् न पश्यतीति भावः), उन्निद्रः—उत्सृष्टा निद्रा येन सः=जागरित एव, शय्यायाः= आस्तरणस्य, उपान्तयोः=सीम्नोः, विवर्तनैः=विलुण्ठनैः, शय्योपान्तविवर्तनैः, एव, क्षपाः=निशाः, विगमयति=अतिवाहयति। यदा दाक्षिण्येन=अत्यन्तानुरोधेन औदार्येण वा, अन्तःपुरेभ्यः=अन्तः- पुरवासिनीभ्यो महिलाभ्यः, उचितां=तत्कालयोग्याम्, वाचम्=वाक्यम्, ददाति=प्रयच्छति, तदा गोत्रेषु=नामसु, स्खलितः=प्रभ्रष्टः (यस्याः कस्याश्चिन्नाम्नि उच्चारयितव्ये भावनाबलात् कृत- शकुन्तलानामप्रयोगः सन्नित्यर्थः), चिरं=चिरकालं, व्रीडया=लज्जया, अवनम्रः=नतमस्तकश्च भवति। अत्र समुच्चयोऽलङ्कारः काव्यलिङ्गं च। शार्दूलविक्रीडितं वृत्तम्॥ ४॥

भावार्थः—राजा दुष्यन्तः शकुन्तलाविरहे स्रक्चन्दनादिकं रमणीयं वस्तु नाभिनन्दति (उद्वेजकत्वात् चक्षुषापि न पश्यति)। पूर्ववत् अमात्यादिभिः मन्त्रणां कृत्वा राजकार्यं सम्यक् न पश्यति। जागरित एव शय्योपान्तविवर्तनैः निशा अतिवाहयति। यदा औदार्येण अन्तःपुरवासिनीभ्यो तत्कालयोग्यां वाचं ददाति तदा गोत्रेषु प्रभ्रष्टः यस्याः कस्याश्चिन्नाम्नि उच्चारयितव्ये भावनाबलात् कृतशकुन्तलानामप्रयोगः सन् चिरं व्रीडया अवनम्रो भवति॥ ४॥

मिश्रकेशी—प्रियं मे प्रियम्=शकुन्तलां प्रति राज्ञोऽनुरागं ज्ञात्वा सहर्षं कथयति मिश्रकेशी इदं वचनं प्रीतिकरम्।

कञ्चुकी—अस्मात् कारणात्, प्रभवतः=बलवत्तरात्, वैमनस्यात्=मनःसन्तापात्, उत्सवः=वसन्तोत्सवः, प्रत्याख्यातः=निराकृतः राज्ञेति शेषः।

देते हैं। उदार स्वभाव के कारण अन्तःपुर की महिलाओं को उत्तर देते समय बरबस जब शकुन्तला का नाम मुख से निकल जाता है तब लज्जा के कारण चिरकाल सिर नीचा कर बैठ जाते हैं॥ ४॥

मिश्रकेशी—मुझे अच्छा लगा, अच्छा लगा।

कञ्चुकी—इसी कारण, अतीव मन की व्याकुलता के कारण उन्होंने वसन्तोत्सव का निषेध किया है।

---

rolling about on the edge of his bed (couch). And when out of politeness he addresses suitable words to the ladies in his harem, then, blundering in their names, he remains perplexed with shame for a long time. (4)

***Miśrakeśī*—**I am very happy to hear or joy to me.

***Chamberlain*—**Owing to the overpowering mental perturbance, the festival has been condemned.

उभे—जुज्जदि। [**युज्यते।**]

(नेपथ्ये) एदु एदु भवं। [**एतु एतु भवान्।**]

कञ्चुकी—(कर्णं दत्त्वा) अये! इत एवाभिवर्त्तते देवः, तत् गच्छतं स्वकर्मानुष्ठानाय।

उभे—तह। [**तथा।**] (इति निष्क्रान्ते।)

(ततः प्रविशति पश्चात्तापसदृशवेशो राजा, विदूषकः प्रतीहारी च)

कञ्चुकी—(राजानं विलोक्य) अहो! सर्वास्ववस्थासु रमणीयकमाकृतिविशेषाणाम्। तथा ह्येवं वैमनस्यपरीतोऽपि प्रियदर्शनो देवः। य एषः—

उभे—युज्यते=उपपद्यते, ईदृशवैमनस्यादुत्सवप्रत्याख्यानमिति भावः। (नेपथ्ये=परोक्षे) एतु एतु भवान्=भवान् अनेन मार्गेण आगच्छतु।

कञ्चुकी—(कर्णं दत्त्वा=श्रवणेन्द्रियमवहितीकृत्य) अये! ससम्भ्रमे सम्बोधनम्, देवः= राजा दुष्यन्तः, इत एव=अत्रैव, अभिवर्तते=आयाति। तत्=तस्मात्, स्वकर्मानुष्ठानाय=स्वकार्य-सम्पादनाय, गच्छतं=युवाम् इति शेषः।

उभे—तथा=यथा भवदादेशस्तथैव कुर्वः (आवां गच्छावः)। (इति=इत्युक्त्वा, निष्क्रान्ते=प्रस्थिते)

(ततः=तदनन्तरम्, पश्चात्तापस्य सदृशः वेशो यस्य स तथाभूतः पश्चात्तापोपयुक्तवेशधारी, राजा=दुष्यन्तः, विदूषकः, प्रतीहारी च, प्रविशते=रङ्गे समागच्छति।)

कञ्चुकी—(राजानं=दुष्यन्तं, विलोक्य=दृष्ट्वा) ,अहो इत्याश्चर्ये विस्मये वा, आकृति-

---

दोनों—उचित ही है।

(नेपथ्य में) आप इधर पधारें।

कञ्चुकी—**(कान देकर)** अरे महाराज इधर ही आ रहे हैं, अतः आप दोनों अपना कार्य करने जाएँ।

दोनों—जो आज्ञा (अच्छा) **(दोनों का बाहर प्रस्थान)।**

(इसके बाद पश्चात्ताप के योग्य वेश धारण किये राजा, विदूषक और प्रतीहारी का प्रवेश)

कञ्चुकी—**(राजा को देखकर)** अहो! विशिष्टाकृति वालों में मनोहरता सभी अवस्थाओं में विद्यमान रहती है। इसीलिए इस विपरीत स्थिति में भी महाराज मनोहर लग रहे हैं।

Both—It is proper.

(Behind the scenes) Let your majesty come, come.

Chamberlain—*(Listening)* Oh! even to this side does his majesty turn. Let your own duty be performed by you.

Both—All right. *(Exeunt)*

(Then enter the king in a dress suited to his repentance, jester and the female door-keeper)

Chamberlain—*(observing the king)* Oh! the loveliness of

प्रत्यादिष्टविशेषमण्डनविधिर्वामप्रकोष्ठे श्लथं
विभ्रत् काञ्चनमेकमेव वलयं श्वासापरक्ताधरः।
चिन्ताजागरणप्रताम्रनयनस्तेजोगुणैरात्मनः
संस्कारोल्लिखितो महामणिरिव क्षीणोऽपि नालक्ष्यते॥ ५॥

विशेषाणां=विशिष्टाकृतीनाम्, सर्वासु अवस्थासु=दुःखावस्थायामपि, रमणीयकम्=रमणीयत्वम्। तथाहि एवम्=ईदृशेन, वैमनस्येन=मनोव्याकुलतया, परीतः=युक्तोऽपि (शकुन्तलाविरहेण दुःखभागपि), प्रियं=मनोहरं, दर्शनं यस्यासौ प्रियदर्शनः=सौम्यमूर्तिः, एव देवः=राजा दुष्यन्तः। य एषः=पुरःस्थितः दुष्यन्तः—

अन्वयः—प्रत्यादिष्टविशेषमण्डनविधिः वामप्रकोष्ठे श्लथम् एकमेव काञ्चनं वलयं बिभ्रत् श्वासापरक्ताधरः। चिन्ताजागरणप्रताम्रनयनः य एषः देवः संस्कारोल्लिखितः महामणिः इव क्षीणोऽपि आत्मनः तेजोगुणैः नालक्ष्यते॥ ५॥

प्रत्यादिष्टेति। प्रत्यादिष्टः=कार्श्यादरतेश्च निराकृतः, विशेषमण्डनस्य=विशिष्टप्रसाधनस्य (हारकुण्डलादीनां), विधिः=विधानं, धारणं येन सः प्रत्यादिष्टविशेषमण्डनविधिः, वामप्रकोष्ठे= वामकूर्परस्याधोभागे, श्लथम्=शिथिलम्, एकमेव=एकमात्रमेव, काञ्चनस्येदं काञ्चनम्=हिरण्मयम्, वलयम्=कटकम्, बिभ्रत्=धारयन्, श्वासैः=उष्णैर्निःश्वासमारुतैः, अपरक्तः=रक्तताविहीनः, अधरः=अधरोष्ठः, यस्य सः श्वासापरक्ताधरः, तथा चिन्तया=शकुन्तलानुध्यानेन, यद् जागरणं= निद्राच्छेदः, तेन प्रताम्रे=अतिलोहिते, नयने यस्य सः चिन्ताजागरणप्रताम्रनयनः, य एषः देवः=दुष्यन्तः, संस्कारेण=शाणवर्षणादिना, उल्लिखितः=तनूकृतः, संस्कारोल्लिखितः, महामणिः= बहुमूल्यरत्नम्, इव, क्षीणोऽपि=कृशोऽपि, आत्मनः=स्वस्य, तेजोगुणैः=प्रभावमहिम्ना, नालक्ष्यते= क्षीणो न दृश्यते। अत्र श्रौतोपमा स्वभावोक्तिश्चालङ्कारौ। शार्दूलविक्रीडितं वृत्तम्॥ ५॥

भावार्थः—निराकृतप्रसाधनविधिः, वामप्रकोष्ठे शिथिलम् एकाकीं हिरण्मयं वलयं धारयन्, उष्णनिश्वासमारुतैः रक्तताविहीनाधरयुक्तः तथा चिन्ताजागरणादिना प्रताम्रनयनः य एषः

इन महाराजा ने अलंकृत होना बन्द कर दिया है। बायीं भुजा में एक मात्र ढीला-ढाला स्वर्णकंकण पड़ा है, ठण्डी साँस लेने से रक्ताभ अधर मलिन हो गये हैं और चिन्तावश जागने के कारण दोनों नेत्र ताम्रवत् रक्तिम हो गये हैं, परन्तु इस प्रकार दुर्बल होने पर भी संस्कारित मणी की भाँति अपने तेज के गुण के कारण ये दुर्बल दिखायी नहीं पड़ते॥ ५॥

---

distinguished figures in all conditions. Though thus longingly anxious, his majesty possesses a pleasing appearance. For—

Discarding forms of special decoration, wearing only a single golden bracelet placed around his left fore-arm, with the lower lip turned pale from sighing, with eyes exceedingly red from wakefulness, caused by thought about his beloved, his majesty although emiciated, is not observed to be so lean, owing to the excellence of his own luster, like a precious gem ground to give it polish. (5)

मिश्रकेशी—(राजानं विलोक्य) ठाणे क्खु पच्चादेसविमाणिदा वि इमस्स किदे सउंतला किलिस्सदि। **[स्थाने खलु प्रत्यादेशविमानितापि अस्य कृते शकुन्तला क्लिश्यति।]**

राजा—(ध्यानमन्दं परिक्रम्य)

प्रथमं सारङ्गाक्ष्या प्रियया प्रतिबोध्यमानमपि सुप्तम्।
अनुशयदुःखायेदं हतहृदयं सम्प्रति विबुद्धम्॥ ६॥

मिश्रकेशी—णं ईदिसाइं तवस्सिणीए भागधेआइं। **[नन्वीदृशानि तपस्विन्या भागधेयानि।]**

देवः शाणघर्षणादिना परिशोधितबहुमूल्यं रत्नमिव स्वकीयप्रभावमहिम्ना क्षीणः सन्नपि क्षीणो न दृश्यते॥ ५॥

मिश्रकेशी—(राजानं=दुष्यन्तं, विलोक्य=दृष्ट्वा) प्रत्यादेशेन=प्रत्याख्यानेन, विमानिता= अवमानितापि, शकुन्तला=कण्वदुहिता, अस्य=दुष्यन्तस्य, कृते=निमित्तम्, यत् क्लिश्यति=विरह-दुःखमनुभवति, तत् स्थाने खलु=युक्तमेव।

राजा—(ध्यानेन=शकुन्तलाविषयकचिन्तया, मन्दम्=शनैःशनैः, परिक्रम्य=पादं प्रक्षिप्य)

अन्वयः—सारङ्गाक्ष्या प्रियया प्रथमं प्रतिबोध्यमानमपि सुप्तम् इदं हतहृदयम् अनुशयदुःखाय सम्प्रति विबुद्धम्॥ ६॥

प्रथममिति। सारङ्गस्य अक्षिणीव अक्षिणी यस्यास्तया सारङ्गाक्ष्या=हरिणाक्ष्या, प्रियया= शकुन्तलया, प्रथमम्=पूर्वम्, प्रतिबोध्यमानमपि=संज्ञाप्यमानमपि, सुप्तम्=निद्रितं, इदं=मदीयम्, हतहृदयम्=दुष्टहृदयम्, चित्तहतकम्, अनुशयदुःखाय=सततपश्चात्तापदुःखानुभवाय, सम्प्रति= इदानीम्, विबुद्धम्=जागरूकम्। अत्र पूर्वार्द्धे विशेषोक्तिः, उत्तरार्द्धे विभावना तथा सारङ्गाक्ष्या इत्यत्र लुप्तोपमा। आर्य्या जातिः॥ ६॥

भावार्थः—सारङ्गाक्ष्या शकुन्तलया पूर्वं प्रतिबोध्यमानमपि निद्रितं मदीयं चित्तहतकं सततपश्चात्तापदुःखानुभवाय इदानीं जागरूकं जातम्॥ ६॥

मिश्रकेशी—(**राजा को देखकर**) इस प्रकार अपमानपूर्वक त्यागी हुई भी शकुन्तला जो इनके लिए विरहदुःख भोग रही है, वह उचित ही है।

राजा—(**चिन्ता के कारण धीरे-धीरे चलकर**)

पहले जब उस मृगनयनी ने अपने विवाह की याद दिलाकर मेरे हृदय को जगाना चाहा तब तो यह जागा नहीं और अब सतत सन्तापदुःख भोगने के लिए जाग उठा है॥ ६॥

मिश्रकेशी—उस बेचारी का भाग्य ही ऐसा है।

Miśrakeśī—*(Observing the king)* Rightly indeed does Śakuntalā, although disrespected by rejection, suffers for this king.

The king—*(Walking round slowly in meditation)* This cruel heart which previously slept although it ws being awakened by my fawn-eyed beloved, has now become awake to suffer the torment of repentance. (6)

Miśrakeśī—Indeed, such are the fortunes of the poor girl.

विदूषकः—(अपवार्य) हुं, भूओवि लंघिदो एसो सउंतलावादेण। ण आणे कधं चिकिच्छिदव्वो भविस्सदि। [**हुँ, भूयोऽपि लङ्घित एष शकुन्तलावातेन। न जाने कथं चिकित्सितव्यो भविष्यति।**]

कञ्चुकी—(उपसृत्य) जयति जयति देवः। देव! प्रत्यवेक्षिताः प्रमदवनभूमयः। यथाकाममध्यास्तां विनोदस्थानानि देवः।

राजा—वेत्रवति! मद्वचनादमात्यपिशुनं ब्रूहि, अद्य चिरप्रबोधान्न सम्भावितमस्माभिर्धर्म्मासनमध्यासितुम्, यत् प्रत्यवेक्षितमार्य्येण पौरकार्य्यं तत् पत्रमारोप्य प्रस्थाप्यतामिति।

मिश्रकेशी—तपस्विन्याः=दीनायाः शकुन्तलायाः, भागधेयानि=भाग्यानि, ईदृशानि ननु=एवम्भूतान्येव।

विदूषकः—(अपवार्य) हुं=वितर्के परिप्रश्ने वा, शकुन्तलावातेन=शकुन्तला शकुन्तलेति वातव्याधिना, भूयोऽपि=पुनरपि, एषः=दुष्यन्तः, लङ्घितः=अभिभूतः, आक्रान्तः। न जाने कथं=केन प्रकारेण, चिकित्सितव्यो भविष्यति=शकुन्तलाया दुर्लभत्वाद् कथमारोग्यं प्राप्यति।

कञ्चुकी—(उपसृत्य=अन्तिकं प्राप्य) जयति जयति देवः=महाराजः। देव=स्वामिन्! प्रत्यवेक्षिताः=पर्यवेक्षिताः, प्रमदवनभूमयः=विहारोचितस्थानानि। देवः यथाकामः=यथेच्छम्, विनोदस्थानानि=विरहवेदनापनोदनोपयुक्तदेशान्, अध्यास्ताम्=अधितिष्ठतु।

राजा—वेत्रवति=प्रतीहार्याः सम्बोधनम्, मद्वचनात्=राज्ञेदमुच्यत इत्युक्त्वा, अमात्यश्चासौ पिशुनश्चेति तममात्यपिशुनम्=पिशुननामधेयं मन्त्रिणं, ब्रूहि=कथय, अद्य=चिरप्रबोधात्, रात्रावतिजागरणात्, अस्माभिः=मया, धर्मासनं=विचारासनं, अध्यासितुम्=अधिष्ठातुम्, न सम्भावितम्=नैव

विदूषक—(रोककर) हूँ, शकुन्तला रूपी वातव्याधि ने फिर इन्हें अभिभूत कर दिया है। न जाने कैसे इसका उपचार होगा?

कञ्चुकी—(पास जाकर) महाराज की जय हो, जय हो। मैंने प्रमदवन का सारा क्षेत्र देख लिया है। अतः अब जहाँ आनन्दानुभूति होती हो वहाँ महाराज बिराजें।

राजा—वेत्रवति! मेरी ओर से मन्त्री पिशुन से कहो कि रात में अधिक देर तक जागने के कारण मैं आज धर्मासन पर नहीं बैठ सकूँगा, अतः उन्होंने नगर का जो कार्य देखा हो उसे पत्रांकित कर मेरे पास भेज दें।

Jester—(Aside) Here he is even again seized by the Śakuntalā-malady (sickness). It is not known how he is to be treated.

Chamberlain—(Approaching) May your majesty be victorious, be victorious. O Lord! the regions of the pleasure-garden have been completely inspected by me. May your majesty occupy the seat of diversion at will.

The king—Vetravatī! speak to minister Piśuna at my words thus owing to having kept awake (at night) for long, it was not possible for me to occupy the judgement seat today. Whatever

प्रतीहारी—जं देवो आणवेदि। **[यद् देव आज्ञापयति।]** (इति निष्क्रान्ता)

राजा—पार्वतायन! त्वमपि स्वनियोगमशून्यं कुरु।

कञ्चुकी—यदाज्ञापयति देवः। (इति निष्क्रान्तः।)

विदूषकः—किदं भअदा णिमक्खिअं, संपदं सिसिरविच्छेअरमणीए इमस्सिं पमदवणुद्देसे अत्ताणं विणोदेहि। **[कृतं भवता निर्मक्षिकम्, साम्प्रतं शिशिरविच्छेदरमणीये अस्मिन् प्रमदवनोद्देशे आत्मानं विनोदय।]**

राजा—(निःश्वस्य) वयस्य! यदुच्यते रन्ध्रोपपातिनोऽनर्था इति तदव्यभिचारि। पश्य—

शक्यम्। अत एव आर्येण=माननीयेन, मन्त्रिणा भवता, यत् पौरकार्यम्=पुरजनसम्बद्धं कर्म, प्रत्यवेक्षितम्=पर्यालोचितम्, तत्=कार्यम्, पत्रमारोप्य=पत्रे लिखित्वा, प्रस्थाप्यताम्=प्रेष्यताम्।

प्रतिहारी—यद्देव=यथा भवान् आज्ञापयति। (इति=इत्युक्त्वा, निष्क्रान्ता)

राजा—पार्वतायन=कञ्चुकीयस्य नामधेयम्। त्वमपि, स्वनियोगम्=स्वाधिकारम्, अशून्यम्=अनुष्ठितम्, कुरु।

कञ्चुकी—यदाज्ञापयति=यथा ब्रवीति, निर्दिशति, देवः=प्रभुः। (इति निष्क्रान्तः)

विदूषकः—कृतम्=विहितम्, भवता=त्वया, निर्मक्षिकम्=निर्जनम्, साम्प्रतम्=अधुना, शिशिरविच्छेदेन=शीतकालापगमेन, रमणीये=मनोहरे, अस्मिन्=सम्मुखस्थे, प्रमदवनोद्देशे=उद्याने, आत्मानं, विनोदय=आनन्दय।

राजा—(निश्वस्य=दीर्घमुष्णञ्चेति) वयस्य=मित्र! यद् उच्यते=कथ्यते लोकैः, अनर्थाः=

प्रतीहारी—जैसी प्रभु की आज्ञा। **(प्रस्थान)**

राजा—पार्वतायन! तुम भी मेरी आज्ञा का पालन करो (अपना कार्य देखो)।

कञ्चुकी—महाराज की जो आज्ञा। **(प्रस्थान)**

विदूषक—आपने इस स्थान को जनशून्य बना दिया है, अतः अब शीतकाल बीत जाने के कारण मनोहर इस प्रमदवन के किसी स्थान पर बैठकर अपना मन बहलाइए।

राजा—**(साँस भरकर)** सखे! जो यह कहा जाता है कि विपत्तियाँ छिद्र पाकर ही उपस्थित हुआ करती हैं, वह ठीक ही है। देखो—

---

business of the citizens may have been looked into by your honour shuld be sent to me after having put it in a letter.

Door-keeper—As your majesty commands. *(Exit)*

The king—Parvatāyana! you also occupy your own office.

Chamberlain—As your majesty commands. *(Exit)*

Jester—You have made the place free from every fly. Now you will recreate yourself in this region of the pleasure-garden, which is delightful on account of the saperation from winter season.

The king—Friend! what they say that calamities rush in at vulnerable points is a saying which never fails. How—

मुनिसुताप्रणयस्मृतिरोधिना मम च मुक्तमिदं तमसा मनः।
मनसिजेन सखे! प्रहरिष्यता धनुषि चूतशरश्च निवेशितः॥७॥
उपहितस्मृतिरङ्गुलिमुद्रया प्रियतमामनिमित्तनिराकृताम्।
अनुशयादनुरोदिमि चोत्सुकः सुरभिमाससुखं समुपैति च॥८॥

उपद्रवाः, रन्ध्रेण=निरूढावकाशेन, उपपतन्ति=आगच्छन्ति, इति रन्ध्रोपपातिनः= छिद्रोपसर्पिणः, तद् वचनम्, अव्यभिचारी=सत्यमेव। पश्य—

अन्वयः—मुनिसुताप्रणयस्मृतिरोधिना तमसा इदं मम मनः मुक्तञ्च। हे सखे! प्रहरिष्यता मनसिजेन धनुषि चूतशरः निवेशितः॥७॥

मुनिसुतेति। मुनिसुतायाः=कण्वदुहितुः शकुन्तलायाः, प्रणयस्य=प्रेम्णः, स्मृतिं, रुणद्धि= प्रतिबध्नाति, तेन मुनिसुताप्रणयस्मृतिरोधिना, तमसा=तमोगुणोद्भवेन मोहेन, इदं मम मनः, मुक्तञ्च=परित्यक्तञ्च, हे सखे! प्रहरिष्यता=प्रहारं करिष्यता, मनसिजेन=कामेन, धनुषि=स्वकीय-पुष्पचापे, चूतशरः=आम्रमञ्जरीरूपबाणः, निवेशितः=मयि निवेशार्थं नियोजितश्च। अत्र स्मरणा-लङ्कारः। द्रुतविलम्बितं वृत्तम्॥७॥

भावार्थः—स्मरेण मयि प्रहर्तुमिच्छतापि एतावत्कालं व्याप्योपयुक्तोऽवसरो न समासादितः, किन्तु तत्र यदैव मम मनो मोहयुक्तं सत् शकुन्तलां स्मृतिं निन्ये, तदानीमेवासौ स्वोपयुक्तावसरमासाद्य मयि प्रहर्तुं सम्प्रवृत्तः॥७॥

अन्वयः—अङ्गुलिमुद्रया उपहितस्मृतिः उत्सुकः अनिमित्तनिराकृतां प्रियतमाम् अनु अनुशयात् रोदिमि च सुरभिमाससुखं समुपैति च॥८॥

उपहितेति। अङ्गुलिमुद्रया=स्वनामाङ्कितकराङ्गुरीयकदर्शनेन, उपहिता=उत्पादिता, स्मृतिः= शकुन्तलापरिणयस्मरणं, यस्य सः तथाभूतोऽहम्, उत्सुकः=उत्कण्ठितः व्याकुलो वा, अनिमित्त-निराकृताम्=अकारणप्रत्यादिष्टाम्, प्रियतमां=शकुन्तलाम्, अनु=लक्ष्यीकृत्य, अनुशयात्=पश्चात्तापात्,

---

मुनितनया शकुन्तला की प्रणयस्मृति में बाधा पहुँचाने वाले मोह ने मेरे मन को छोड़ दिया (और यह देखकर) कामदेव ने अपने धनुष पर आम्रमञ्जरी का बाण चढ़ा लिया॥७॥

उस नामाङ्कित अँगूठी ने मेरी स्मृति जगा दी कि मैंने अकारण ही अपनी निर्दोष प्रियतमा को छोड़ दिया था। अब उसके लिए व्याकुल होकर सतत रोता रहता हूँ और इधर यह वसन्त का आनन्ददायी मास भी आ उपस्थित हुआ है॥८॥

No sooner was my mind abandoned by the darkness which obstructed the remembrance of my love for the sage's daughter, then oh friend! the shaft of the mango-blossom was fixed on his flowery bow by the mind-born (Kāma) who is about to strike (on me). (7)

That ring on which my name was engraved awakened the memory of mine. I insulted and discarded my beloved wife unnecessarily. Now, being anxious for her, I am contineuously weeping. Mean while (when I am in such a critical posiiton)

विदूषकः—भो वअस्स! चिट्ठ दाव इमिणा दंडकट्ठेण कंदप्पवाणं णासेमि। **[भो वयस्य! तिष्ठ तावत् अनेन दण्डकाष्ठेन कन्दर्पबाणं नाशयामि।]** (इति दण्डकाष्ठमुद्यम्य चूताङ्कुरं ताडयितुमिच्छति।)

राजा—(सस्मितम्) भवतु, दृष्टं ब्रह्मवर्च्चसम्। सखे! क्वेदानीमुपविष्टः प्रियायाः किञ्चिदनुकारिणीषु लतासु दृष्टिं विनोदयामि ?

विदूषकः—णं भअदा आसण्णपरिचारिआ लिविअरी मेहाविणी आदिट्टा माहवीलदाहरए इमं वेलं अदिवाहिस्सं तहिं चित्तफलए मे सहत्थलिहिदं तत्थभोदीए सउंतलाए पडिकिदिं आणेहि त्ति। **[ननु भवता आसन्नपरिचारिका लिपिकरी मेधाविनी आदिष्टा माधवीलतागृहे इमां वेलामतिवाहयिष्यामि तस्मिन् चित्रफलके मे स्वहस्तलिखितां तत्रभवत्याः शकुन्तलायाः प्रतिकृतिमानयेति।]**

रोदिमि=विलपामि च, सुरभिमाससुखं=वसन्तमासोपस्थितिबन्धनं सुखम्, समुपैति=समुपस्थितं भवति च। अत्र समुच्चयोऽलङ्कारः, स्मरणालङ्कारोऽपि। द्रुतविलम्बितं नाम वृत्तम्॥ ८॥

भावार्थः—प्रियावियोगजनितदुःखावकाशमासाद्यैव निरतिशयसुरतसुखसम्पादको वसन्तमासः समायातः॥ ८॥

विदूषकः—भोः वयस्य=सखे! तावत्=तावत्कालपर्यन्तम्, तिष्ठ=सन्तापं मा कृथाः। (यावत्) अनेन=करस्थितेन, दण्डकाष्ठेन=लगुडेन, कन्दर्पबाणं=स्मरसन्निहितआम्रमुकुलबाणं, नाशयामि=निहन्मि। (इति=इत्युक्त्वा, दण्डकाष्ठमुद्यम्य=लगुडंमुत्तोल्य, चूताङ्कुरम्=आम्रमुकुलं, ताडयितुं=कन्दर्पबाणत्वादाहन्तुम्, इच्छति=वाञ्छति।

राजा—(सस्मितम्=सेषद्धासम्) भवतु=कन्दर्पबाणनाशनोद्योगः, ब्रह्मवर्चसम्=ब्रह्मतेजः, दृष्टम्=प्रत्यक्षीकृतम् (परिहासोक्तिरियम्)। अथ परिहासमपवार्य प्रकृतानुसरणेन सन्तापशान्तेरुपायं पृच्छति—सखे! क्व=कस्मिन् स्थाने, उपविष्टः=स्थितिमान् भूत्वा, प्रियायाः=शकुन्तलायाः, किञ्चिदनुकारिणीषु=स्वल्पसादृश्यवतीषु, लतासु, दृष्टिं=नयनम्, विनोदयामि=आनन्दयामि।

विदूषक—मित्र! आप जरा ठहरिये, मैं इस लाठी से कामदेव के बाण को नष्ट किये देता हूँ। **(यह कहकर लाठी उठाकर आम्रमञ्जरी पर प्रहार करना चाहता है।)**

राजा—(मुस्कराकर) अच्छा, मैंने तुम्हारा ब्रह्मतेज देख लिया। सखे! (बताओ) इस समय मैं कहाँ बैठकर प्रियतमा का अनुकरण करने वाली लताओं को देखकर अपने नेत्रों को आनन्दित करूँ।

---

the month of spring season which is full of pleasure has arrived too. (8)

Jester—Dear! wait a while I shall destroy the arrow of cupid (kāma) by means of this wooden stick. *(Raising the wooden stick, desires to destroy the mango-sprout)*

The king—*(With a smile)* Let it be, the Bramanical power is seen. Friend! where seated shall I amuse my sight among the creepers that slightly imitate my beloved.

राजा—ईदृशमेव हृदयाश्वासनम्। तत्तदेवादेशय माधवीलतागृहम्।

विदूषकः—इदो इदो एदु भवं। **[इत इत एतु भवान्।]**

(इत्युभौ परिक्रामतः, मिश्रकेशी अनुगच्छति)

विदूषकः—एसो मणिसिलावट्टसणाहो माहवीलदामंडवो विवित्तदाए उवहाररमणीज्जदाए णिसग्गमारुदेण अ साअदेण विअ पडिच्छदि तुमं, ता पविसिअ निसीददु भवं। **[एष मणिशिलापट्टसनाथो माधवीलतामण्डपो विविक्ततया उपहाररमणीयतया निसर्गमारुतेन च स्वागतेनेव प्रतीच्छति त्वाम्; तत् प्रविश्य निषीदतु भवान्।]**

विदूषकः—नन्विति सम्बोधने, भवता=त्वया, आसन्नपरिचारिका=सततसन्निकृष्टा सेविका, लिपिकरी=चित्ररचनाकारिणी, मेधाविनी=स्मरणशक्तिसम्पन्ना (अत एव सा न विस्मरिष्यतीति भावः), सा भवता आदिष्टा=उक्ता, यत्, माधवीलतागृहे=माधवीलतानिर्मितगृहे, इमां वेलां=वर्तमानकालम्, अतिवाहयिष्यामि=यापयिष्यामि। तस्मिन् प्रदेशे, चित्रफलके= चित्राङ्कनपट्टे, मे=मम, स्वहस्तलिखितां=स्वकरचित्रिताम्, तत्रभवत्याः=मान्यायाः, शकुन्तलायाः= कण्वदुहितायाः, प्रतिकृतिम्=प्रतिमूर्तिम्, आनय इति आदिष्टा।

राजा—ईदृशमेव=शकुन्तलाप्रतिकृतिदर्शनजन्यमेव, हृदयस्य=विरहसन्तप्तचित्तस्य, आश्वासनं=शान्त्युपायः अस्ति। तत्=तस्मात्, तदेव=माधवीलतामण्डपमेव, आदेशय=तन्मार्गप्रदर्शनेन ब्रूहि।

विदूषकः—इत इतः=अमुनानेन मार्गेण, एतु=आगच्छतु, भवान्।

(इति=इत्युक्त्वा, उभौ=राजा विदूषकश्च, परिक्रामतः=सञ्चरणं कुर्वतः।) (मिश्रकेशी अनुगच्छति=राजाविदूषकयोः पश्चात् गच्छति।)

विदूषक—आपने अपनी सतत पार्श्ववर्तिनी, विशेष स्मरणशक्तिसम्पन्ना चित्रकारिणी को बताया था कि मैं माधवी लतामण्डप में यह समय बिताऊँगा। वहीं (तुम) मेरे द्वारा चित्रफलक पर अङ्कित प्रियतमा शकुन्तला की प्रतिकृति लेती आना।

राजा—अब इसी प्रकार मन को बहलाना होगा। तो चलो माधवीलतागृह का ही मार्ग दिखाओ।

विदूषक—इधर इधर आयें महाराज!

(दोनों घूमते हैं। मिश्रकेशी पीछे-पीछे चलती है।)

Jester—Why! the personal attendant, who has very sharp memory and is an artist has been ordered by you thus—'I shall pass this time in the bower of the Mādhavī creeper. Bring there the portrait of her ladyship Śakuntalā, which on the painting board and is drawn by my own hand.

The king—Such a place for diverting the heart. Therefore show the way for the bower of the Mādhavī creeper.

Jester—This way, this way your majesty may proceed.

(Both walk raund, Miśrakeśī goes after)

(उभौ प्रविश्योपविष्टौ)

मिश्रकेशी—लदासंस्सिदा पेक्खिस्सं दाव पिअसहीए पडिकिदिं, तदो से भत्तुणो वहुमदं अणुराअं णिवेदइस्सं। [**लतासंश्रिता प्रेक्षिष्ये तावत् प्रियसख्याः प्रतिकृतिम्, ततः अस्या भर्तुर्बहुमतम् अनुरागं निवेदयिष्यामि।**] (इति तथा कृत्वा स्थिता।)

राजा—(निःश्वस्य) सखे! सर्वमिदानीं स्मरामि शकुन्तलायाः प्रथमदर्शनवृत्तान्तम्, यं किल कथितवानस्मि भवते। स भवान् प्रत्यादेशसमये मत्समीपगतो नासीत्, किन्तु पूर्वमपि न त्वया कदाचित् सङ्कीर्तितं तत्रभवत्या नामादिकम्। कच्चिदहमिव विस्मृतवांस्त्वमपि।

विदूषकः—एषः=पुरः स्थितः, मणिशिलायाः=मणिमयशिलायाः, पट्टकेन=फलकेन, सनाथः=युक्तः, मणिशिलापट्टसनाथः, माधव्याः लतायाः मण्डपः=कुञ्जः, माधवीलतामण्डपः, विविक्ततया=विजनतया, उपहारेण=उपायनीकृतेन कुसुमावचयेन, या रमणीयता=मनोहरता, तया उपहाररमणीयतया, निसर्गमारुतेन=प्राकृतिकवायुना, च, स्वागतेनेव=स्वागतप्रश्नेनेव, त्वाम्, प्रतीच्छति=प्रतिगृह्णाति। तत्=तस्मात्, प्रविश्य=प्रवेशं विधाय, निषीदतु=विरहतापापनेतुम् उपविशतु, भवान्। (उभौ=राजा विदूषकश्च, प्रविश्य उपविष्टौ)

मिश्रकेशी—लतासंश्रिता=लतावलम्बिनी भूत्वा (लतापृष्ठभागे तिरोहिता भूत्वा), प्रियसख्याः=शकुन्तलायाः, प्रतिकृतिम्=चित्रम्, प्रेक्षिष्ये=अवलोकयिष्यामि। ततः=तत्पश्चात्, अस्याः=शकुन्तलायाः समीपे, भर्तुः=पत्युः, बहुमतं=बहुमानयुक्तं, अनुरोगं=स्नेहं, निवेदयिष्यामि=ज्ञापयिष्यामि। (इति तथा कृत्वा=लता संश्रित्य, स्थिता।)

राजा—(निःश्वस्य=दीर्घमुष्णञ्च निःश्वासं परित्यज्य) सखे!=माधव्य! इदानीम्=सम्प्रति, शकुन्तलायाः=स्वकीयप्रियायाः, सर्वम्=अखिलम्, प्रथमदर्शनवृत्तान्तम्=प्राथमिकसाक्षात्कारकाले

विदूषक—मणिमय शिलापट्ट से युक्त यही माधवीलतामण्डप है। एकान्त में छितराये हुए फूलों के कारण रमणीय तथा प्राकृतिक वायु से सम्पन्न यह प्रदेश मानो स्वागतार्थ आपको बुला रहा है। अतः आप यहाँ प्रवेश कीजिए।

(दोनों प्रविष्ट होकर बैठते हैं।)

मिश्रकेशी—लताओं के पीछे छिपकर मैं अपनी प्रियसखी शकुन्तला का चित्र देखूँगी। इसके पश्चात् शकुन्तला के प्रति इनका जितना आदर और अनुराग है, वह शकुन्तला को जाकर बताऊँगी। **(यथोक्त ढंग से बैठ जाती है।)**

राजा—**(ठण्डी साँस भरकर)** सखे! अब मुझे शकुन्तला के प्रथम मिलन का पूरा

Jester—Here the Mādhavī bower, furnished with a slab of crystal stone, is no doubt greeting us with a welcome as though, owing to the lovliness of the offering in the form of the bunches of flowers. Let your majesty take a seat. *(Both effecting entrance take seats)*

Miśrakeśī—Resorting to the creeper, I shall just see my friend's portrait. Then I shall tell her, her husband's manifold affection. *(Remains doing the same)*

The king—*(With a sigh)* Friend! now I remember all about

मिश्रकेशी—अदो ज्जेव महीबदिहिं खणंपि सहिअआओ सहाआओ णु विरहिदव्वाओ। [**अत एव महीपतिभिः क्षणमपि सहृदयाः सहाया न विरहितव्याः।**]

विदूषकः—ण विसुमरामि, किंतु सव्वं कहिअ अवसाणे उण तुए भणिदं—परिहासविअप्पिओ एसो, ण भूदत्थोत्ति; मए वि मंदबुद्धिणा तधा ज्जेव गहीदं। अधवा भविदव्वदा क्खु एत्थ बलवदी। [**न विस्मरामि, किन्तु सर्वं कथयित्वा अवसाने पुनस्त्वया भणितम्—परिहासविजल्पित एषः, न भूतार्थ इति; मयापि मन्दबुद्धिना तथैव गृहीतम्। अथवा भवितव्यता खल्वत्र बलवती।**]

संवृत्तवृत्तजातम्, स्मरामि=स्मरणपथमानयित्वा विभावयामि। यं=प्रथमदर्शनवृत्तान्तम्, किल इति सम्भावनायाम्, भवते=विदूषकाय, कथितवानस्मि=द्वितीयाङ्के निवेदितवानस्मि। स भवान्=त्वम्, प्रत्यादेशसमये=शकुन्तलाप्रत्याख्यानावसरे, मत्समीपगतः=मत्समीपस्थः, नासीत्। किन्तु, पूर्वमपि=प्रत्यादेशात् प्रागपि, त्वया=विदूषकेण, तत्रभवत्याः=माननीयायाः शकुन्तलायाः, नामादिकम्, न कदाचित्=न कदापि, सङ्कीर्तितम्=नोच्चरितम्, कच्चित्=किम्? अहमिव=यथाहं तथैव त्वमपि, विस्मृतवान्।

मिश्रकेशी—अत एव=एतस्माद् विस्मरणरूपाद्धेतोरेव, महीपतिभिः=राजभिः, क्षणमपि=मुहूर्त्तमपि, सहृदयाः=प्रशस्तमनस्काः, सहायाः=सखायः, न विरहितव्याः=न त्यक्तव्याः।

विदूषकः—न विस्मरामि=सर्वमेव वृत्तजातमवगच्छामि, किन्तु=परन्तु, सर्वं=शकुन्तलावृत्तान्तम्, कथयित्वा=सूचयित्वा, अवसाने=वाक्यशेषे, पुनः=भूयः, त्वया=भवता, भणितम्=कथितम्, एषः=मदुक्तशकुन्तलापरकवृत्तान्तः, परिहासविजल्पितः—परिहासेन, विजल्पितः=

समाचार स्मरण आ रहा है—जो मैं आपको बता चुका हूँ। जिस समय मैंने उसका परित्याग किया आप मेरे पास नहीं थे किन्तु पहले भी कभी आप मान्या शकुन्तला का नाम आदि कभी जबान पर नहीं लाये। क्या मेरी ही तरह आप भी तो उसे भूल नहीं गये थे?

मिश्रकेशी—इसीलिए क्षणभर भी राजा को किसी सहृदय सहायक के बिना अकेले नहीं रहना चाहिए।

विदूषक—मैं भूला नहीं हूँ किन्तु उस समय आपने सारा वृत्तान्त सुनाने के बाद कहा था कि यह सब मजाक में कहा है, सच न समझ लेना और इसीलिए मन्दबुद्धि मैंने भी

---

the first meeting with Śakuntalā. I also had told it to you. You were not present near me at the time of repudiation. Even before was never mentioned by you the name of her ladyship. Was it that you have also forgotten (her) like me?

Miśrakeśī—That's why, I, king should not remain alone even for a moment, leaving his generous friends or helpers.

Jester—I do not forget. But after telling all in the end again you said thus—this is a random talk in just, not a real fact. By me

मिश्रकेशी—एवं णेदं। [**एवमेतत्।**]

राजा—(क्षणं ध्यात्वा) सखे! परित्रायस्व माम्।

विदूषकः—भो वअस्स! किं एदं तुह उववण्णं? ण कदा वि सप्पुरिसा सोअचित्ता होंति। णं पवादेवि णिक्कंपाज्जेव गिरिओ। [**भो वयस्य! किमेतत्तव उपपन्नम्? न कदापि सत्पुरुषाः शोकचित्ता भवन्ति। ननु प्रवातेऽपि निष्कम्पा एव गिरयः।**]

राजा—वयस्य! निराकरणविक्लवायास्ते सख्यास्तामवस्थामनुस्मृत्य बलवद-शरणोऽस्मि। सा हि—

कथितः (अनर्थकमुक्तः), न भूतार्थः=न सत्यार्थ इति। मन्दबुद्धिना=जडबुद्धिना, मया= विदूषकेणापि, तथैव=परिहासविजल्परूपेणैव, गृहीतम्=अङ्गीकृतम् (बुद्धम्), अथवा=पक्षान्तरे, भवितव्यता=नियतिः, खल्विति निश्चयेन, अत्र=अस्मिन् प्रकरणे (विषये), बलवती=बलिष्ठा।

मिश्रकेशी—एवमेतत्—एतत्=अत्रालोच्यमानं वस्तु, एवम्=ईदृशमेव, नाऽत्र कोऽपि दोषभाक् इत्यर्थः।

राजा—(क्षणं ध्यात्वा=मुहूर्तं विचिन्त्य) सखे! मां=राजानं, परित्रायस्व=परिरक्ष।

विदूषकः—भो वयस्य!=भो मित्र! तव=राज्ञो दुष्यन्तस्य, एतत्=कातरभावः, किमुपपन्नम्=किं सङ्गतम्? सत्पुरुषाः=साधवः, शोकः=इष्टवियोगदुःखं, चित्ते येषान्ते शोकचिताः, कदापि=कस्यामपि दशायाम्, न भवन्ति। ननु=यस्मात्, प्रवातेऽपि वाते, गिरयः=पर्वताः, निष्कम्पाः=अचला एव तिष्ठन्ति।

राजा—निराकरणेन=प्रत्याख्यानेन, विक्लवायाः=कातरायाः, निराकरणविक्लवायाः, ते= तव, सख्याः=शकुन्तलायाः, ताम्=अतिशयशोचनीयाम्, अवस्थाम्=दशाम्, अनुस्मृत्य=चिन्त-

---

उसे उसी रूप में मान लिया था अथवा कहना चाहिए कि इस प्रसंग में भाग्य की ही प्रधानता रही है।

मिश्रकेशी—यही ठीक है।

राजा—(**क्षणभर ध्यान करके**) सखे! मेरी रक्षा करो।

विदूषक—क्या ऐसा कहना तुम्हारे लिए उचित है? सत्पुरुष कभी शोकाकुल नहीं होते। प्रबल वायु के प्रवाह में भी पर्वत अडिग ही रहते हैं।

राजा—मित्र! तुम्हारी सखी शकुन्तला जब मेरे द्वारा त्याग देने के कारण व्याकुल हो

---

also, whose intellect is like a lump of clay, it was understood as even so or destiny indeed is powerful.

Miśrakeśī—So it is indeed.

The king—*(Meditating for a white)* Friend! save me.

Jester—Oh friend! what is this? Such (speach) is really unbecoming of you. Never do good persons allow themsalves to be the receptacle of grief. Why even in a tempetuous wind the mountain remain quiverless (immovable).

The king—Friend! recollecting the condition of my

इतः प्रत्यादिष्टा स्वजनमनुगन्तुं व्यवसिता
स्थिता तिष्ठेत्युच्चैर्वदति गुरुशिष्ये गुरुसमे।
पुनर्दृष्टिं बाष्पप्रकरकलुषामर्पितवती
मयि क्रूरे यत्तत् सविषमिव शल्यं दहति माम्॥ ९॥

मिश्रकेशी—अम्हहे! ईदिसी परवसदा इमस्स मंपि संदाबेदि। **[अहो! ईदृशी परवशता अस्य मामपि सन्तापयति।]**

यित्वा, बलवत्=अत्यर्थमेव, अशरणः=दुःखाक्रमणात् निरालम्बः, अस्मि। हि=यस्मात्, सा= शकुन्तला—

अन्वयः—इतः प्रत्यादिष्टा स्वजनम् अनुगन्तुं व्यवसिता, (परञ्च) गुरुसमे गुरुशिष्ये तिष्ठ इति उच्चैः वदति सति स्थिता सा क्रूरे मयि बाष्पप्रकरकलुषां दृष्टिं यत् पुनरर्पितवती तत् सविषं शल्यमिव मां दहति॥ ९॥

इत इति। इतः=मत्सकाशात्, प्रत्यादिष्टा=निराकृता सती, स्वजनं=शार्ङ्गरवादिम्, अनु-गन्तुम्=अनसर्तुं, व्यवसिता=उद्युक्ता, (परञ्च) गुरुसमे=कण्वसदृशे (गुरुवन्माननीये), गुरुशिष्ये= गुरुसदृशे शार्ङ्गरवे, तिष्ठ=अनुगमनाद् विरम, इति=इमं शब्दम्, उच्चैः=तारस्वरेण, वदति सति, स्थिता=अनुसरणान्निवृत्ता, सा=शकुन्तला, क्रूरे=कठोरहृदये, मयि=दुष्यन्ते, बाष्पाणां=नेत्रोदकानां, प्रकरेण=निर्गमेन, कलुषां=मलिनां, बाष्पप्रकरकलुषाम्, दृष्टिं=नयनम्, यत् पुनरर्पितवती= निक्षिप्तवती, तत्=दृष्ट्यर्पणम्, सविषम्=विषाक्तम्, शल्यमिव=बाणाग्रमिव, मां दहति=सन्तापयति। अत्र सविषं शल्यमिव इति श्रौतोपमा तथा लाटानुप्रासश्चालङ्कारौ। शिखरिणी वृत्तम्॥ ९॥

भावार्थः—सा मत्सकाशात् निराकृता सती स्वान् गताः, तैरपि त्यक्ता पुनर्मामेव प्राप्ता, क्रूरस्त्वं तथापि विमुखे एव आसम्। अद्य पुनस्तत् सर्वं स्मृत्वा अत्यर्थमशरणोऽस्मीति तर्कयामि॥ ९॥

गई थी—उस समय की उसकी अवस्था का स्मरण कर मैं स्वयं को सर्वथा असहाय-सा पाता हूँ। क्योंकि जब वह—

मेरे द्वारा अपमानित होकर स्वजनों के साथ जाने लगी उस समय गुरु (पिता) के समान कण्व के शिष्य शार्ङ्गरव ने उसे ऊँचे स्वर में रुकने का आदेश दिया था, इस पर उसने रुककर मुझ क्रूर पर अपनी आँसुओं से कलुषित जो दृष्टि डाली थी वह विष-बुझे बाण के अग्रभाग की तरह आज भी मुझे जला (साल) रही है॥ ९॥

मिश्रकेशी—ओह! इसकी ऐसी अधीरता तो मुझे भी सन्तप्त बनाये दे रही है।

---

beloved, distressed at my rejection, I have become exceedingly helpless. For she—

Owing to her repudiation from her (i.e. from me), moved to follow her own kinsmen, (but) stopped as her father's pupil, who was her father's equal, was loudly saying 'stay' (and she) again cast her eye bedimmed with the flow of tears, on me, who was cruel, it is all that which burns me like an envenomed (infuse poison) shaft.

विदूषकः—भो! अत्थि मे तक्को, केन उण तत्थभोदी आआससंचारिणा णीदेत्ति। **[भोः! अस्ति मे तर्कः, केन पुनस्तत्रभवती आकाशसञ्चारिणा नीतेति।]**

राजा—वयस्य! कः पतिव्रतां तामन्यः परामर्ष्टुमुत्सहते। मेनका किल सख्यास्ते जन्मप्रतिष्ठेति तत्सखीजनादस्मि श्रुतवान्; तत्सहचरीभिस्तया वा नीतेति हृदयमाशङ्कते।

मिश्रकेशी—संमोहे वि विह्मणीओ क्खु इमस्स पडिबोधो। **[सम्मोहेऽपि विस्मयनीयः खल्वस्य प्रतिबोधः।]**

मिश्रकेशी—अहो! इत्याश्चर्ये, अस्य=राज्ञो दुष्यन्तस्य, ईदृशी, परवशता=पराधीनता, मामपि=उदासीनामपि, सन्तापयति=व्याकुलयति।

विदूषकः—भो=भो वयस्य! केनापि आकाशसञ्चारिणा=व्योमविहारिणा पुरुषेण, तत्रभवती=मान्या शकुन्तला, नीता=अपहृता, इति मे=मम, तर्कः=अनुमानमस्ति।

राजा—वयस्य=सखे! कोऽन्यः=कः लम्पटः (अपरः), पतिव्रतां=साध्वीम्, तां= शकुन्तलाम्, परामर्ष्टुम्=स्प्रष्टुम्, उत्सहते=अध्यवस्यति, मेनका=तदाख्या अप्सराः, किल=इति निश्चये, ते=तव, सख्याः=शकुन्तलायाः, जन्मप्रतिष्ठा=उत्पत्तिस्थानमस्ति, इति=एवम्, तत्सखी-जनात्=शकुन्तलासखीजनसकाशाद्, श्रुतवान् अस्मि। तत्सहचरीभिः—तस्याः=मेनकायाः, सह-चरीभिः=सखीभिः, तया वा=मेनकया वा, नीता=स्वस्थानं प्रापिता (अपहृता), इति=ईदृशम्, मे= मम, हृदयम्=चित्तम्, आशङ्कते=सम्भावयति।

मिश्रकेशी—सम्मोहेऽपि=चित्तविकलतायामपि, विस्मयनीयः=आश्चर्यकरः, खल्विति निश्चये, अस्य= दुष्यन्तस्य, प्रतिबोधः=अनुभवः।

विदूषक—मित्र! मैं जानना चाहूँगा कि कौन आकाशचारी उन्हें उड़ा ले गया होगा?

राजा—मित्र! अन्य कौन व्यक्ति उस पतिव्रता का स्पर्श कर सकता है? मेनका तुम्हारी सखी की माता है, यह मैंने शकुन्तला की सखियों से सुना था। इसी से सम्भावना होती है कि मेनका की सहचरियों में से कोई अथवा स्वयं मेनका ही उसे अपने स्थान पर ले गई होगी।

मिश्रकेशी—इस प्रकार की व्याकुलता के अवसर पर भी इनकी स्मरणशक्ति आश्चर्यजनक है।

***Miśrakeśī*—**Oh! such devotion is pinning me too.

***Jester*—**Oh! I want to know, by which aerial being her ladyship was taken away?

***The king*—**Who else would dare to touch rudely her; a chest women? I have heard that Menakā is really the place of your friend's birth. My heart suspects that your friend was carried away by her companions or by Menakā herself.

***Miśrakeśī*—**The infatuation indeed is to be wondered at not the awakening.

विदूषकः—भो! जइ एव्वं, ता समस्ससदु भवं; अत्थि क्खु समागमो कालेण तत्थभोदिए। [**भो! यद्येवम्, तत् समाश्वसितु भवान्; अस्ति खलु समागमः कालेन तत्रभवत्याः।**]

राजा—कथमिव ?

विदूषकः—ण क्खु मादापिदरा भत्तिविओअदुक्खिदं दुहिदरं चिरं पेक्खिदुं पारेंति। [**न खलु मातापितरौ भर्तृवियोगदुःखितां दुहितरं चिरं प्रेक्षितुं पारयतः।**]

राजा—वयस्य!

स्वप्नो नु माया नु मतिभ्रमो नु क्लृप्तं नु तावत् फलमेव पुण्यैः।
असन्निवृत्त्यै तदतीतमेव मनोरथानामतटप्रपातः॥ १०॥

विदूषकः—भो इति सम्बोधने, यद्येवं=यदि शकुन्तला मेनकया तत्सखीभिः वा नीता चेत्, तत्=तदा, समाश्वसितु भवान्=त्वम् आश्वासनमानय। खलु=यस्मात् , कालेन=कदापि, तत्रभवत्याः= शकुन्तलायाः, समागमः=सम्मेलनम्, अस्ति=भविष्यत्येव।

राजा—कथमिव=केन रूपेण सम्भावयामि ?

विदूषकः—माता च पिता च मातापितरौ, भर्त्तुः=पत्युः, वियोगेन=विरहेण, दुःखितां= सन्तापवतीम्, भर्तृवियोगदुःखिताम्, दुहितरं=कन्याम्, चिरं=दीर्घकालम्, प्रेक्षितुं=द्रष्टुं, न=नहि, खल्विति निश्चये, पारयतः=शक्नुतः।

राजा—वयस्य!

अन्वयः—तत् स्वप्नो नु माया नु मतिभ्रमो नु पुण्यैः तावदेव फलं क्लृप्तं नु। तत् असन्निवृत्त्यै अतीतं मनोरथानाम् अतटात् प्रपातः (एव) भवति॥ १०॥

स्वप्न इति। तत्=शकुन्तलालक्षणं वस्तु तत्सङ्गमनसुखं वा, स्वप्नो नु=स्वाप्नं वस्तु किम्? माया नु=ऐन्द्रजालिकादि निर्मितं वस्तु किम्? मतिभ्रमो नु=मतिभ्रमेण प्रतीतं वस्तु किम्?

विदूषक—यदि ऐसा है तो आप धैर्य रखें, निश्चय ही यथासमय शकुन्तला के साथ आपका मिलाप होगा।

राजा—कैसे ?

विदूषक—माँ-बाप पतिवियोग से दुःखी कन्या को अधिक समय तक नहीं देख सकते।

राजा—मित्र! मेरा और शकुन्तला का जो मिलन हुआ था, वह स्वप्न था, माया थी, मेरी बुद्धि का भ्रम था अथवा मेरे पूर्वजन्मार्जित पुण्यों का एकमात्र फल था? वह सम्मिलन

Jester—If so, there is indeed union with her ladyship in time.

The king—How possibily?

Jester—Not indeed are the father and the mother able to behold their daughter afflicted (harassed) by separation from her husband.

The king—Friend!

Was it a dream or an illusion or a delusion of the mind or

विदूषकः—भो! मा एव्वं। णं अंगुलीअअं ज्जेव एत्थ णिदंसणं। अवस्संभाविणो अचिंतणीअसमागमा होंति। [**भोः! मैवम्। नन्वङ्गुरीयकमेवात्र निदर्शनम्। अवश्यम्भाविनोऽचिन्तनीयसमागमा भवन्ति।**]

राजा—(अङ्गुरीयकं विलोक्य) अये! इदं तदसुलभस्थानभ्रंशि शोचनीयम्।

पुण्यैः=पूर्वजन्मार्जितसुकृतैः, तावदेव=तत्परिमितकालभोग्यमेव, फलं=शकुन्तलासङ्गमनसुखरूपम्, क्लृप्तं नु=उत्पादितं किम्? तत्=शकुन्तलासङ्गमनसुखम्, असन्निवृत्त्यै=अपुनरावर्त्तनाय, अतीतं= गतमेव, मनोरथानां=तद्गताभिलाषाणां पुनः, अतटात्=भृगोः उच्चस्थानात्, प्रपातः=प्रकर्षेण पतनमेव भवतीति शेषः। अत्रोत्प्रेक्षालङ्कारः, पूर्वार्द्धे तु शुद्धसन्देहोऽलङ्कारः। काव्यलिङ्गमलङ्कार इति केचित्। उपजातिर्वृत्तम्॥ १०॥

भावार्थः—यथा कश्चिज्जनः पर्वतादेरुच्चदेशात् पतितो मृत्युमुखं याति तद्वन्ममाभिलाषपरम्परापि शकुन्तलासङ्गमनसुखरूपविषयात् प्रभ्रष्टा विनाशमुपगच्छतीत्यनर्थकं तदाशाकरणमिति भावः॥ १०॥

विदूषकः—भो! मैवं भण, ननु=यस्मात्, अत्र=शकुन्तलासङ्गमनादिरूपविषये, अङ्गुरीयकम्=अङ्गुलिमुद्रैव, निदर्शनम्=दृष्टान्तः। (यथा मत्स्योदरगतस्यासम्भावितसमागमस्याप्यङ्गुरीयकस्य पुनर्लाभो दैवेन घटितः तथैव शकुन्तलया सह सङ्गमं भविष्यतीत्याशयः।) अवश्यं भविष्यन्तीत्यवश्यम्भाविनो विषयाः, अचिन्तनीयः=अनिर्द्धारणीयः, समागमः=सङ्गमः, येषान्ते अचिन्तनीयसमागमाः भवन्ति (नैराश्यं मा व्रज शकुन्तलासमागमोऽवश्यं भविष्यतीति भावः)।

राजा—(अङ्गुरीयकं=कराङ्गुलिमुद्रिकां, विलोक्य=दृष्ट्वा) अये! इति विषादे, इदम्=अङ्गुरीयकम्, तद्=शकुन्तलाया अङ्गुलीरूपं यदसुलभं=दुष्प्रापं, स्थानं, तस्मात् भ्रश्यति=पततीति तथोक्तं, तदसुलभस्थानभ्रंशि, शोचनीयम्=शोच्यमेव सञ्जातम् (शकुन्तलाङ्गुलीरूपस्थानस्य भूयो दुष्प्रापत्वादिति भावः)।

सुख तो चला ही गया, अब लौटकर नहीं आयेगा। इसी कारण उस विषय में जितनी आशाएँ (कल्पनाएँ, संभावनाएँ) की जा रही हैं वे सब ऊँचे शिखर से नीचे गिरने वाले प्रपात की भाँति शून्य में विलीन हो रही हैं॥ १०॥

विदूषक—अरे! ऐसा न कहो। देखो, वह अँगूठी ही इस विषय का प्रमाण है। अवश्यंभावी बात के संयोग भी सहसा ही बनते हैं।

राजा—(**अँगूठी को देखकर**) ओह! यह अँगूठी उस दुर्लभ स्थान पर गिर गई थी, यही बात इस समय शोक का कारण बन गई है।

---

merit exhausted with only that much fruit? That has gone away, never to return. These hopes are indeed falls from a precipice.

Jester—Oh! not so. The ring itself is an illustration that a union, which is necessarily to take place happens unthought of.

The king—*(Looking the ring)* Oh! this in the mean while is to be lamented, fallen as it is from a not easily obtainable place.

तव सुचरितमङ्गुरीय! नूनं प्रतनु कृशेन विभाव्यते फलेन।
अरुणनखमनोहरासु तस्याश्च्युतमसि लब्धपदं यदङ्गुलीषु॥ ११॥

मिश्रकेशी—जइ अण्णहत्थगदं भवे, तदो सच्चं सोअणीअं भवे। सहि! दूरे वट्टसि, एआइणि ज्जेव कण्णसुहाइं अणुभवेमि। **[यदि अन्यहस्तगतं भवेत्, ततः सत्यं शोचनीयं भवेत्। सखि! दूरे वर्त्तसे, एकाकिन्येव कर्णसुखानि अनुभवामि।]**

विदूषकः—भो! इअं णाममुद्दा केण उद्देसेण भअदा तत्थभोदीए हत्थसंसग्गं पाविदा। **[भोः! इयं नाममुद्रा केन उद्देशेन भवता तत्रभवत्या हस्तसंसर्गं प्रापिता।]**

अन्वयः—हे अङ्गुरीय! कृशेन तव सुचरितं नूनं प्रतनु विभाव्यते, यत् अरुणनखमनोहरासु तस्याः अङ्गुलीषु लब्धपदं (त्वम्) च्युतमसि॥ ११॥

तवेति। हे अङ्गुरीय! कृशेन=क्षुद्रेण फलेन, तव सुचरितं=तादृशफलनिदानभूतं पुण्यम्, नूनम्=निश्चितम्, प्रतनु=क्षुद्रमासीदिति, विभाव्यते=मयानुमीयते, यत्=यस्मात्, अरुणैः=लोहित-वर्णैः, नखैः=कररुहैः, मनोहरासु अरुणनखमनोहरासु, तस्याः=शकुन्तलायाः, अङ्गुलीषु, लब्धं पदं येन तत् लब्धपदम्=प्राप्तावस्थानं सत् (त्वम्), च्युतम्=ततो भ्रष्टमसि। अत्र अनुमान-समासोक्तिश्चालङ्कारौ। पुष्पिताग्रा वृत्तम्॥ ११॥

भावार्थः—हे अङ्गुरीयक! यदि तावत्तव सुचरिताधिक्यं स्यात् तदावश्यं दीर्घकाल-व्याप्यावस्थानमपि स्यात्तत्तु नास्तीत्याशयः॥ ११॥

मिश्रकेशी—यदि, अन्यहस्तगतं=दुष्यन्तेतरकरगतम्, ततः=तदा, सत्यम्=अवश्यम्, शोचनीयम्=शोच्यम्, भवेत्। सखि! (शकुन्तलामुद्दिश्य कथयति) दूरे वर्त्तसे=यत्समीपे न वर्त्तसे, (अत एव) एकाकिन्येव=त्वद्विनैव, कर्णसुखानि=श्रवणमधुराणि राजवचनानि, अनुभवामि।

विदूषकः—भोः! इयं नाममुद्रा=नामाङ्कितमङ्गुरीयकम्, केनोद्देशेन=किमुद्दिश्य, भवता=त्वया, तत्रभवत्याः=शकुन्तलायाः, हस्तसंसर्गं=करसम्बन्धम्, प्रापिता=नीता।

मुद्रिके! अल्प फल देखकर तुम्हारा पुण्य भी अल्प ही है—मैं ऐसा अनुमान करता हूँ, क्योंकि तुम उस शकुन्तला के रक्तवर्ण नखों वाली अँगुली में स्थान पाकर भी गिर पड़ी थी॥ ११॥

मिश्रकेशी—यदि यह किसी और के हाथ लग जाती तो अवश्य शोक का कारण बन जाती। सखी! तुम यहाँ से दूर हो, अतः मैं अकेली ही कर्णसुख भोग रही हूँ।

विदूषक—हाँ, तो आपने अपने नाम से अंकित यह अँगूठी किस उद्देश्य से उनके हाथ में दी थी?

Your good deed O ring! is proved by the fruit to be indeed very small, like mine, since having obtained a position on her fingers attractive with their red nails, you have slipped down.

Miśrakeśī—If it had gone to another's hand, quite surely it would have been lamentable (regret). Friend! as you are away, I alone am enjoying the happiness of the ear.

Jester—Oh! by what occasion was this signet ring placed into her ladyship's hand?

मिश्रकेशी—मम वि कोदूहलेण वावारिदो एसो। [**ममापि कौतूहलेन व्यापारित एषः।**]

राजा—वयस्य! श्रूयताम्, तदा स्वनगराय तपोवनात् प्रस्थितं मां प्रिया सबाष्पमाह स्म—'कियच्चिरेणार्यपुत्रः पुनरस्माकं स्मरिष्यती'ति।

विदूषकः—तदो तदो। [**ततस्तः।**]

राजा—अथैनां मुद्रामङ्गुल्यां निवेशयता मया प्रत्यभिहिता।

विदूषकः—किं त्ति? [**किमिति?**]

मिश्रकेशी—अपीति प्रश्ने, मम, कौतूहलेन=शकुन्तलायै नाममुद्रार्पणस्य कारण-श्रवणेच्छया, एषः=विदूषकः, अपि व्यापारितः=पृच्छकत्वेन किं नियुक्तः (कथमयं मम कौतुकोत्पत्तिक्षणे एव पृच्छतीत्याशयः।)

राजा—वयस्य=सखे! श्रूयताम्=आकर्ण्यताम्, तदा, स्वनगराय=स्वनगरं हस्तिनापुरम्, तपोवनात्=कण्वाश्रमात्, प्रस्थितम्=प्रस्थातुमारब्धम्, मां=दुष्यन्तम्, प्रिया=शकुन्तला, सबाष्पम्=साश्रुजलम्, आह स्म, कियच्चिरेण=कियद्विलम्बेन, आर्यपुत्रः, पुनः=भूयः, अस्माकम्=अस्मान्, स्मरिष्यति इति।

विदूषकः—ततस्ततः=तदनन्तरं किमभूत्?

राजा—अथ=शकुन्तलायास्तादृशप्रश्नात् परम्, एनां=सम्प्रति मद्हस्तगताम्, मुद्राम्=अङ्गुलीयम्, अङ्गुल्यां=शकुन्तलाया अङ्गुलौ, निवेशयता=परिधापयता, मया=दुष्यन्तेन, प्रत्यभि-हिता=प्रत्युक्ता।

विदूषकः—किमिति=किं त्वया सा प्रत्यभिहिता?

मिश्रकेशी—क्या मेरे ही कौतूहल ने इसे यह बात पूछने के लिए प्रेरित किया है?

राजा—मित्र! सुनो, जिस समय मैं तपोवन से विदा हो रहा था—उसी समय मेरी प्रिया ने आँखों में आँसू भरकर कहा था—"आर्यपुत्र अब कितने दिन बाद मेरा स्मरण करेंगे?"

विदूषक—तब, तब क्या हुआ?

राजा—इसके बाद अँगूठी उनकी अंगुली में पहनाते हुए मैंने कहा—

विदूषक—क्या कहा?

Miśrakeśī—He also has been impelled by my quriosity.

The king—Friend! listen, as I started for the capital, my beloved with tears in her eyes asked me this—"After how long will my lord remember me?"

Jester—Then (what) then (happened)?

The king—Afterwerds as I put this ring on her finger, I answered her thus—

Jester—What?

राजा—

एकैकमत्र दिवसे दिवसे मदीयं नामाक्षरं गणय गच्छसि यावदन्तम्।
तावत् प्रिये! मदवरोधनिदेशवर्त्ती नेता जनस्तव समीपमुपैष्यतीति॥ १२॥

तच्च दारुणात्मना मया मोहान्नानुष्ठितम्।

मिश्रकेशी—रमणीओ क्खु अवही विहिणा विसंवादिदो। **[रमणीयः खल्ववधिर्विधिना विसंवादितः।]**

अन्वयः—प्रिये! अत्र दिवसे दिवसे एकैकं नामाक्षरं गणय। यावत् अन्तम् गच्छसि तावत् मदवरोधनिदेशवर्ती नेता जनः तव समीपम् उपेष्यति॥ १२॥

एकैकमिति। हे प्रिये!=शकुन्तले! अत्र=तपोवने (स्थितैव त्वम्), दिवसे दिवसे=प्रतिदिनम्, (मदीयम्) एकैकम्=एकमेकम्, नामाक्षरम्=दुष्यन्त इति नाम्नोऽक्षरं, गणय=गणितं कुरु। यावत्=यदा, अन्तम्=चरमक्षरम्, गच्छसि=गणनया प्राप्स्यसि, तावत्=तदा, मदवरोधस्य=ममान्तः-पुरस्य, निदेशे=आज्ञायां, वर्त्तत इति मदवरोधनिदेशवर्ती=मम सौधान्तःपुरचरो कञ्चुकीयः, नेता=त्वामन्तःपुरं प्रापयिष्यन्, जनः, तव समीपम्=अन्तिकम्, उपैष्यति=आगमिष्यति। अत्र पर्यायोक्तिरलङ्कारः, वसन्ततिलकं वृत्तम्॥ १२॥

भावार्थः—अचिरादेव त्वां नेतुं ममान्तःपुरस्थो जनः आगमिष्यति इत्येवं कथयित्वा समाश्वासिता मया प्रिया॥ १२॥

तत्=प्रियानेतृजनप्रेषणेनानयनम्, दारुणः=भीषणः, आत्मा यस्य सः तेन दारुणात्मना=भयङ्करस्वभावेन, मया=दुर्जनेन दुष्यन्तेन, मोहात्=चित्तविभ्रमात्, नानुष्ठितम्=न कृतम्।

मिश्रकेशी—रमणीयः=शोभनः, अवधिः=नेतृजनप्रेषणेनान्तःपुरानयनकालसीमा, विधिना=दैवेन, विसंवादितः=विपरीतीकृतः। (नानाक्षरगणना तु बहुशः जाता अन्तःपुरप्राप्ता नेता तु न समायात इति विसंवादितत्वं दैवेनेति चिन्त्यम्।)

राजा—इसी तपोवन में रहती हुई आप एक-एक दिन हमारे नाम के एक-एक अक्षर गिनें। जब गणना अन्तिमाक्षर पहुँचेगी उससे पूर्व ही हमारे अन्तःपुर का कोई सेवक आपको ले जाने के लिए आपके पास पहुँच जायेगा॥ १२॥

और वह दिया हुआ वचन कठोर प्रकृतिवाला मैं मोहवश पूरा न कर सका।

मिश्रकेशी—विधाता ने इन दोनों के उस सुन्दर समय को विपरीत कर दिया।

***The king*—**Darling! count one letter at a time of my name here day by day. As soon as you reach to the end, the person, who will lead you to the entrance of the apartments of my harem, will arrive into your presence. (12)

And that promise was not fulfilled by me, hard-hearted that I am.

***Miśrakeśī*—**A charming appointment (period of time) indeed was failed by the luck itself.

विदूषकः—भो! कधं लोहिदमच्छस्स वडिसं विअ मुहप्पविट्टं एदं आसी? **[भोः! कथं रोहितमत्स्यस्य वडिशमिव मुखप्रविष्टमेतदासीत्।]**

राजा—शचीतीर्थे सलिलं वन्दमानायास्ते सख्या हस्ताद्गङ्गास्रोतसि परिभ्रष्टम्।

विदूषकः—जुज्जदि। **[युज्यते।]**

मिश्रकेशी—अदो क्खु तवस्सिणीए सउंतलाए अधर्मभीरुणो एदस्स राएसिणो परिणए संदेहो जादो। अधवा ण ईदिसो अणुराओ आहिणाणं अवेक्खदि? दा कधं विअ एदं। **[अतः खलु तपस्विन्याः शकुन्तलाया अधर्मभीरोरस्य राजर्षेः परिणये सन्देहो जातः। अथवा नेदृशोऽनुरागः अभिज्ञानमपेक्षते। कथमिवैतत्।]**

विदूषकः—भोः=वयस्येति शेषः, कथम्=केन प्रकारेण, लोहितमत्स्यस्य=मत्स्यविशेषस्य, वडिशमिव=मत्स्यधारणास्त्रमिव, एतद् अङ्गुरीयकम्, मुखप्रविष्टम्, आसीत्।

राजा—शचीतीर्थे=शक्रावतारतीर्थस्य शचीघट्टे, सलिलं=पावनं जलं, वन्दमानायाः= स्पर्शपूर्वकं प्रणमन्त्याः, ते=तव, सख्याः=शकुन्तलायाः, हस्तात्=करात्, गङ्गास्रोतसि=गङ्गाप्रवाहे, परिभ्रष्टम्=निपतितम् (अङ्गुरीयकम्) (स च खाद्यबुध्या रोहितमत्स्येन भक्षितम्)।

विदूषकः—युज्यते=शकुन्तलाहस्तादङ्गुरीयकस्य गङ्गास्रोतसि पतनं रोहितोदरगमनञ्च सङ्गच्छत इत्यर्थः।

मिश्रकेशी—अतः खलु=अभिज्ञानभूतायाः अङ्गुलिमुद्रायाः प्रभ्रंशादेव, तपस्विन्याः= दीनायाः, शकुन्तलायाः, परिणये=गान्धर्वविवाहविषये, अधर्मात्=पापात्, भीरोः=भयशीलस्य

विदूषक—सखे! वंशी की भाँति यह अँगूठी उस रोहू मछली के पेट में कैसे जा पहुँची?

राजा—जब तुम्हारी सखी शचीतीर्थ में जल की वन्दना कर रही थी उस समय वह अँगूठी गिरकर गंगा की धारा में जा पड़ी (जहाँ खाद्य समझ कर उसे रोहू मछली ने निगल लिया।)

विदूषक—हो सकता है।

मिश्रकेशी—इसी से इस तपस्विनी शकुन्तला के साथ विवाह ही में इस अधर्मभीरु राजर्षि को सन्देह हो गया। इस प्रकार का प्रगाढ़ प्रेम तो किसी स्मृतिचिह्न की अपेक्षा ही नहीं रखता। तब यह विस्मरण ही इसे कैसे हुआ?

***Jester*—**How did it reach inside the belly of a Rohita fish, like a hook?

***The king*—**It slipped into the stream of the Ganges from the hand of your friend, while she was doing obeisance to the Śachī-tīrtha.

***Jester*—**That's right.

***Miśrakeśī*—**Hence indeed arose the doubt of this sin fearing royal sage regarding the marriage with poor Śakuntalā. Or, how is it that such an affection requires a token of recollection of past memories (recognition).

राजा—उपालप्स्ये तावदिदमङ्गुरीयकम्।

विदूषकः—(सस्मितम्) भो! अहं पि दाव एदं दंडकट्टं उवालहिस्सं। कधं उज्जुअस्स मे कुडिलं तुमं सि त्ति। [**भो अहमपि तावदेतत् दण्डकाष्ठमुपालप्स्ये। कथम् ऋजुकस्य मे कुटिलं त्वमसीति।**]

राजा—(तदश्रृण्वन्नेव)

कथं नु तं कोमलबन्धुराङ्गुलिं करं विहायासि निमग्नमम्भसि।

अथवा—

अचेतनं नाम गुणं न वीक्षते मयैव कस्मादवधीरिता प्रिया॥ १३॥

(परस्त्रीस्पर्शपापशङ्किनः), अस्य राजर्षेः=ऋषिकल्पस्य अस्य राज्ञो दुष्यन्तस्य, सन्देहः=संशयः—मयेयं परिणीता न वेति संशयः, जातः=उत्पन्नः, अथवा=उत, ईदृशः=अलौकिकः, अनुरागः=प्रणयः, अभिज्ञानम्=स्मृतिहेतुचिह्नम्, नापेक्षते=नाकाङ्क्षति स्मारयितुमिति शेषः, तत्=तस्मात्, एतत्=विस्मरणम्, कथमिव=कीदृशम्?

राजा—तावत्=अत एव, इदं=मत्स्योदरादुपलब्धम्, विस्मृतिकारणभूतम्, अङ्गुरीयकम्=करमुद्रिकाम् (एव), उपालप्स्ये=भर्त्सयिष्ये।

विदूषकः—(सस्मितम्=सेषद्धासम्) अहमपि=त्वमिव अहमपि, एतत्=मदीयकर-स्थितम्, दण्डकाष्ठम्=काष्ठनिर्मितदण्डम्, उपालप्स्ये=भर्त्सयिष्ये, कथम्=केन कारणेन, ऋजुकस्य=सरलप्रकृतेः, मे=मम सम्बन्धे, त्वं कुटिलं=वक्रम् असि। (तथा च मम दण्डोपालम्भनस्येव तवाङ्गुलीयकोपालम्भनस्यापि निष्फलत्वमेवेति भावः।)

राजा—(तत्=विदूषककथनम्, अश्रृण्वन्=कर्णगोचरमकुर्वन्नेव)

अन्वयः—हे अङ्गुरीय! कोमलबन्धुराङ्गुलिं तं करं विहाय अम्भसि कथं नु निमग्नामसि? (अथवा) अचेतनं गुणं न वीक्षते (किन्तु) मयैव कस्मात् प्रिया अवधीरिता॥ १३॥

कथंन्विति। हे अङ्गुरीय! कोमलाः=मृदुलाः, बन्धुराः=सुन्दराः, अङ्गुलयो यस्य तं

राजा—तो अब मैं इसी अँगूठी को उपालम्भ दूँगा।

विदूषक—(मुस्कराकर) तो अब मैं भी अपनी लाठी का तिरस्कार करूँगा। हे लाठी! मैं तो सीधा-सादा हूँ फिर तुम मेरी होकर इतनी कुटिल क्यों हो?

राजा—(विदूषक की बात अनसुनी कर)

हे अँगूठी! जिसकी अँगुलियाँ कोमल तथा ऊँची-नीची थीं, प्रिया के उस हाथ को छोड़कर न जाने तुम क्यों जल में डूब गई थी? अथवा यह अचेतन (प्रिया की अँगुलियों) गुणों को कैसे पहचानता, हमीं ने उस समय प्रिया का परित्याग क्यों किया?॥ १३॥

The king—I shall now rebuke this ring.

Jester—I too rebuke my stick. Thus O stick! when I am so simple (straight) why you are so cruel?

The king—(Not taking any notice of his words)

O' ring! how possibly could you deeply drowned (merge) into the water, having left that hand of beautiful and delicate

मिश्रकेशी—सअं ज्जेव पडिवण्णो जं अम्हि वत्तुकामा। [**स्वयमेव प्रतिपन्नः, यदस्मि वक्तुकामा।**]

विदूषकः—भो! सव्वधा अहं बुभुक्खाए मारिदव्वो। [**भोः! सर्वथा अहं बुभुक्षया मारयितव्यः।**]

राजा—(अनादृत्य) प्रिये! अकारणपरित्यागादनुशयदग्धहृदयस्तावदनुकम्प्यतामयं जनः पुनर्दर्शनेन।] (प्रविश्य चित्रफलकहस्ता)

कोमलबन्धुराङ्गुलिम्, तं=शकुन्तलायाङ्गभूतम्, करम्=हस्तम्, विहाय=त्यक्त्वा, अम्भसि=गङ्गाजले, कथं=केन निमित्तेन, नु=इति प्रश्ने, निमग्नमसि=निमज्जितमसि? अथवा, अचेतनं=चेतनाविरहितं वस्तु, गुणं=सौन्दर्यप्रेमादिकं, न वीक्षते=न पश्यति, (किन्तु) मयैव=सचेतनेनैव, कस्मात्=केन निमित्तेन, प्रिया=अनुरागसर्वस्वभूता शकुन्तला, अवधीरिता=तिरस्कृता। अत्र अवधीरणायाः कारणाभावेऽपि तदुत्पत्तेर्विभावनालङ्कारः, तृतीयचरणे सामान्येन विशेषसमर्थनरूपोऽर्थान्तरन्यासोऽलङ्कारः। वंशस्थविलं वृत्तम्॥ १३॥

भावार्थः—हे अङ्गुरीय! कोमलबन्धुराङ्गुलिं शकुन्तलायाङ्गभूतं करं विहाय त्वं किन्निमित्तेन गङ्गाजले निमग्नासि? अथवा स्वभावत एव अचेतनं गुणं न पश्यति किन्तु सचेतनेनैव मया कस्मात् मदीयहृदयसर्वस्वभूता प्रिया शकुन्तला तिरस्कृता, कथमिदमाचरितं मया इति न जाने॥ १३॥

मिश्रकेशी—यत्=अचेतनस्य गुणदर्शित्वम्, वक्तुकामा=प्रतिविवक्षुरस्मि, तत् नाचेतनस्य गुणदर्शित्वम्, स्वयमेव=प्रष्टा (राजा), प्रतिपन्नः=स्वीकृतवान् (सम्प्रति नास्ति मे तद्विवक्षावसरः इति भावः)।

विदूषकः—भोः! सर्वथा=पूर्णतः (बाढमेव), अहं=विदूषकः, बुभुक्षया=क्षुधातया, मारयितव्यः=विनाशयितव्यः। (तव प्रियासमालोचनापेक्षया मम भोजनसमालोचनस्य गरीयस्त्वाद् त्वदेतदालोचनं विहाय गृहं चल, नो चेत्तव प्रियासमालोचना मामत्रैव विनशिष्यतीति भावः।)

राजा—(अनादृत्य=विदूषककथनमवहेलनापूर्वकं श्रुत्वा). प्रिये! अकारणपरित्यागेन

मिश्रकेशी—मैं जो कुछ कहना चाहती थी, उसे ये स्वयं स्वीकार करते हैं।

विदूषक—अरे! जान पड़ता है भूख से मुझे मार ही डाला जायेगा।

राजा—(**उपेक्षापूर्वक**) प्रिये! बिना कारण तुम्हारा त्याग कर देने से सन्ताप के कारण मेरा हृदय जला जा रहा है, अतएव पुनः दर्शन देकर इस व्यक्ति पर दया करो।

---

fingers? Or rather—It may be that an animate object may not observe excellence. Why did I myself repudiate my beloved. (13)

Miśrakeśī—What I wanted to say, he (the king) accepts himself.

Jester—How am I to be devoured by hunger?

The king—O causelessly discarded beloved! let this person whose heart burns due to remorse, be just favoured with your sight again.

चेटी—भट्टा! इअं चित्तगदा भट्टिनी। **[भर्त्तः! इयं चित्रगता भट्टिनी।]** (इति चित्रफलकं दर्शयति)

राजा—(विलोक्य) अहो! रूपमालेख्यगताया अपि प्रियायाः। तथाहि—

दीर्घापाङ्गविसारिनेत्रयुगलं लीलाञ्चितभ्रूलतं
दन्तान्तःपरिकीर्णहासकिरणज्योत्स्नाविलिप्ताधरम् ।
कर्कन्धूद्युतिपाटलोष्ठरुचिरं तस्यास्तदेतन्मुखं
चित्रेऽप्यालपतीव विभ्रमलसत्प्रोद्भिन्नकान्तिद्रवम्॥ १४॥

योऽनुशयः=पश्चात्तापः, तेन दग्धं हृदयं=मनः, यस्य सः अकारणपरित्यागादनुशयदग्धहृदयः, अयं=मल्लक्षणो जनः, पुनर्दर्शनेन=पुनः दर्शनप्रदानेन, अनुकम्प्यताम्=अनुगृह्यताम्।

(प्रविश्य=प्रवेशं विधाय, चित्रफलकहस्ता=चित्रपटहस्ता)

चेटी—चित्रकर्तृमेधाविनी, भर्त्तः=हे स्वामिन्! चित्रगता=आलेख्यपट्टस्था स्वहस्त-चित्रिता, भट्टिनी=ते अकृताभिषेका पत्नी। (इति=इत्युक्त्वा, चित्रफलकं=चित्रपट्टं, दर्शयति।)

राजा—(विलोक्य=चित्रफलकं दृष्ट्वा) आलेख्यगतायाः=चित्रलिखितायाः अपि, प्रियायाः=शकुन्तलायाः, रूपम्, अहो=आश्चर्यम्। तथाहि रूपोत्कर्षं दर्शयितुमाह—

अन्वयः—दीर्घापाङ्गविसारिनेत्रयुगलं लीलाञ्चितभ्रूलतं दन्तान्तःपरिकीर्णहासकिरण-ज्योत्स्नाविलिप्ताधरं कर्कन्धूद्युतिपाटलोष्ठरुचिरं विभ्रमलसत्प्रोद्भिन्नकान्तिद्रवम् एतत् तस्याः तत् मुखं चित्रेऽपि आलपतीव॥ १४॥

दीर्घेति। दीर्घाभ्यां=विशालाभ्याम्, अपाङ्गाभ्याम्=नयनप्रान्ताभ्याम्, विसारि=विस्तारवत्, नेत्रयुगलम्=नेत्रद्वयम्, यत्र तत् दीर्घापाङ्गविसारिनेत्रयुगलम्, लीलया=विलासेन, अञ्चिते=शोभिते, भ्रूलते=लते इव भ्रुवौ, यत्र तत् लीलाञ्चितभ्रूलतम्, दन्तानां=दशनानाम्, अन्तः=अभ्यन्तरेषु, परिकीर्णाः=व्याप्ताः, ये हासकिरणाः=स्मितदीप्तयः, ते एव ज्योत्स्नाः=चन्द्रिकाः (कौमुदीः), ताभि-

---

दासी—(हाथ में चित्रफलक लेकर प्रविष्ट होकर) महाराज! ये चित्रस्थ स्वामिनी हैं। **(यह कहकर चित्रपट्ट दिखाती है)**

रांजा—(देखकर) मात्र चित्रांकित भी प्रिया का रूप कितना सुन्दर है; क्योंकि—

नेत्रों के प्रान्तभाग एवं नेत्र दोनों ही विस्तृत हैं। विलास के कारण भ्रूलता भी सुशोभित है। दन्तपंक्ति के मध्य से निकलती हुई ज्योत्स्ना की भाँति ईषद् हास्य की किरणों से दोनों ओठ व्याप्त हैं। पक्वबदरी फल के समान रक्तिम ओष्ठ अतीव सुन्दर प्रतीत हो रहे हैं। मुखारविन्द

Maid servant—(Entering with the picture-board in hand) Here is my mistress in the picture. *(Shows the picture-board)*

The king—(Observing) What a charming appearence of my beloved, even if it painted only in a picture-board.

The angles of the eyes and the eyes both are drawn extendingly, the eye-brows are also appearing very graceful, as though moon light coming out from the row of teeth, the sweet smile spreading over the teeth. Her lips, like fully developed

विदूषकः—(विलोक्य) साहु वअस्स! साहु, जं तए महुरो भट्टिणीए दंसितो भवाणुप्पवेसो, खलादि विअ मे दिट्ठी णिहुदप्पदेसेसु। किं बहुणा, सत्ताणुप्पवेससंकाए आलवणकोदूहलं मे जणअदि। **[साधु वयस्य! साधु, यत् त्वया मधुरो भट्टिन्या दर्शितो भावानुप्रवेशः, स्खलतीव मे दृष्टिर्निभृतप्रदेशेषु। किं बहुना, सत्त्वानुप्रवेशशङ्कया आलपन-कौतूहलं मे जनयति।]**

विलिप्तौ=व्याप्तौ, अधरौ=ओष्ठौ, यस्मिन् तत् दन्तान्तःपरिकीर्णहासकिरणज्योत्स्नाविलिप्ताधरम्, कर्कन्धोः=पक्वबदरीफलस्य, द्युतिरिव=कान्तिरिव, द्युतिर्यस्य सः अत एव पाटलः=श्वेतरक्तः, यः ओष्ठस्तेन रुचिरं=मनोज्ञम्, कर्कन्धूद्युतिपाटलोष्ठरुचिरम्, विभ्रमेण=शृङ्गारभावविकारविशेषेण, लसत्=शोभमानम्, तथा प्रोद्भिन्ना=आविर्भूता, कान्तिः=शोभाविशेषः, येभ्यस्ते च ते द्रवाः= स्वेदबिन्दवः, यस्मिन् तत् विभ्रमलसत्प्रोद्भिन्नकान्तिद्रवम्, एतत्=चित्रफलके चित्रितम्, तस्याः=शकुन्तलायाः, तत्=प्रागनुभूतम्, मुखम्=आननम्, चित्रे=आलेख्ये अपि, आलपतीव=प्रेम्णा मामाभाषत इव। अत्र 'भ्रूलता' इत्यंशे उपमा, 'हासकिरणज्योत्स्ना' इत्यंशे एकदेशवर्त्ति रूपकम्, 'आलपतीव' इत्यंशे क्रियोत्प्रेक्षालङ्कारश्च। शार्दूलविक्रीडितं वृत्तम्॥ १४॥

भावार्थः—चित्रफलके चित्रितं प्रियायाः मुखं, प्रियामुखस्थभावपरिचयं यथावद् ददत् चित्रेऽपि प्रेम्णा मामाभाषत इव अनुभवामि इत्याशयः॥ १४॥

विदूषकः—(विलोक्य=दृष्ट्वा) साधु=शोभनम्, वयस्य=मित्र! साधु, यत्=यस्मात्, त्वया= भवता, मधुरः=दृष्टिप्रियः, भट्टिन्याः=शकुन्तलायाः, भावानुप्रवेशः=चित्रेऽपि चेष्टानुबन्धः, दर्शितः= प्रकटितः, मे=मम, दृष्टिः=नेत्रदर्शनशक्तिः, निभृतप्रदेशेषु=गुप्तावयवभागेषु, स्खलतीव=सञ्चरतीव।

विलास के कारण विशेष सुन्दर प्रतीत हो रहा है। उस पर झलकती हुई पसीने की बूँदें कान्तिद्रव-सी प्रतीत हो रही है और इस प्रकार समष्टि रूप में प्रिया का यह चित्रांकित मुख भी मुझे ऐसा प्रतीत हो रहा है मानो मुझ से बातें कर रहा हो॥ १४॥

विदूषक—ठीक है मित्र! ठीक है, क्योंकि आपने चित्रफलक पर स्वामिनी (शकुन्तला) के भावों का जिस कुशलतापूर्वक चित्रण किया है उससे मेरी दृष्टि इसके गुह्य स्थानों में मानों स्वयं ही दौड़ने लगी है। अधिक कहने से क्या लाभ? मानो यह सजीव हो इस आशंका से मेरे मन में इससे बात करने की उत्कण्ठा स्वयमेव उत्पन्न हो रही है।

(riped) Jujule fruit, are appearing very pleasent. Through flurry (excitement) the sweat drops are appearing as if it jucy drops of lovelyness and with all these qualities and appearances the face of my beloved which is drawn in this picture-board appears as speaking to me.

Jester—Excellent my friend! excellent. The representation of the various feelings (such as fear, curiosity etc. as described in previous verse) in beautiful on account of the exquisite delineation. My sight as though stumbles in the secret parts of the painting it self and with a doubt as if it is living one, my quriosity compells me to make conversation with it. What to say more?

मिश्रकेशी—अम्हो! एसा राएसिणो वत्तिआलेहणिउणदा। जाणे पिअसही मे अग्गदो वट्टदि त्ति। [**अहो! राजर्षेर्वर्तिकालेखनिपुणता। जाने प्रियसखी मे अग्रतो वर्त्तते इति।**]

राजा— यद् यत् साधु न चित्रे स्यात् क्रियते तत्तदन्यथा।
तथाप तस्या लावण्यं लेखया किञ्चिदन्वितम्॥ १५॥

किं बहुना वक्तव्येनेति शेषः, सत्त्वस्य=प्राणस्य, अनुप्रवेशः=समावेशः, तस्य शङ्कया=सम्भावनया, सत्त्वानुप्रवेशशङ्कया=अस्याः प्रतिकृतौ प्राणाः सन्तीति सम्भावनया, मे=मम, आलपने =भाषणे, कौतूहलं=कौतुकम्, आलपनकौतूहलं, जनयति=उत्पादयति। (चित्रफलकगतायामपि तां प्रियां चेष्टासन्निवेशदर्शनात् सजीवामिव तां मत्त्वा आलपितुमिच्छामीति भावः।)

मिश्रकेशी—अहो इत्याश्चर्ये, राजर्षेः=दुष्यन्तस्य, वर्त्तिकया=तूलिकया, या लेखा=चित्रणं, तस्यां निपुणता=दक्षता, वर्तिकालेखनिपुणता, जाने=अनुभवामि (मन्ये)। प्रियसखी=शकुन्तला, मे=मम, अग्रतः=पुरतः, वर्त्तते=तिष्ठति (अस्ति)।

राजा—

अन्वयः—यद् यत् चित्रे साधु न स्यात् तत् तत् अन्यथा क्रियते तथापि तस्याः लावण्यं लेखया किञ्चित् अन्वितम्॥ १५॥

यद्यदिति। यद् यत्=अङ्गं, चित्रे=आलेख्ये, साधु=सम्यक् सुन्दरं वा, न स्यात्=न भवेत् (प्रकृताङ्गस्य सुन्दरत्वादविकलचित्रणे तु शोभनं नैव भवेदिति भावः), तत् तत्=अङ्गम्, अन्यथा= सौन्दर्यविधानाय प्रकृतमूर्त्तितो विफलम्, क्रियते=चित्रकारैः सुन्दरं विधायैव चित्र्यत इत्याशयः। तथापि=एवं चित्रकारपद्धतौ सत्यामपि, तस्याः=शकुन्तलायाः, लावण्यं=शरीरावयवसौष्ठवम्, लेखया=मत्कृतचित्रेण, किञ्चित्=ईषदेव, अन्वितम्=सम्बद्धम्॥ १५॥

भावार्थः—शकुन्तलायाः सर्वाङ्गव्यापिलावण्यस्य चित्रे निवेशनाय यत्ने कृतेऽपि तत् लावण्यं स्वल्पमेव आयातम्। विधिना परिकल्पितसर्वयोग्या सा कथं मानुषेण मया यथावदालेख्यते इति भावः॥ १५॥

मिश्रकेशी—राजर्षि की चित्र-निर्माण कला आश्चर्यजनक है। मुझे तो ऐसा प्रतीत होता है मानो मेरी प्रिय सखी शकुन्तला मेरे सामने ही विराजमान है।

राजा—चित्रकार चित्र बनाते समय जिस-जिस अंग में सुन्दरता की कमी देखता है उसकी पूर्ति करता चलता है परन्तु इस चित्रांकन द्वारा शकुन्तला का सौन्दर्य बढ़ा नहीं, बल्कि कुछ घटा ही है॥ १५॥

***Miśrakeśī*—**Oh this skill of the royal sage is really wonderful. I feel as my deer friend is standing (siting) in front of me.

***The king*—**What ever may be not good in the picture is constantly being made otherwise (i.e. improved). Yet her loveliness is to a small extent imitated (reduced) by the drawing. (15)

तथा हि—

अस्यास्तुङ्गमिव स्तनद्वयमिदं, निम्नेव नाभिः स्थिता
दृश्यन्ते विषमोन्नताश्च वलयो भित्तौ समायामपि।
अङ्गे च प्रतिभाति मार्दवमिदं स्निग्धप्रभावाच्चिरं
प्रेम्णा मन्मुखमीषदीक्षत इव स्मेरा च वक्तीव माम्॥ १६ ॥

मिश्रकेशी—सरिसं एव्वं पच्चादावगुरुणो सिणेहस्स। [सदृशमेवं पश्चात्तापगुरोः स्नेहस्य।]

तथाहि=किञ्च—

अन्वयः—समायामपि भित्तौ (इदं) अस्याः इदं स्तनद्वयं तुङ्गम् इव (वर्त्तते), तथा नाभिः निम्ना इव स्थिता, वलयः विषमोन्नताः दृश्यन्ते, अङ्गे इदं मार्दवं च चिरं प्रतिभाति; प्रेम्णा मन्मुखम् ईषत् ईक्षत इव तथा च स्मेरा मां वक्तीव (प्रतिभाति) ॥ १६ ॥

अस्या इति। समायामपि=समतलायामपि, भित्तौ=चित्रफलके (आधारे), अस्याः= शकुन्तलायाः, इदं=पुरोदृश्यमानम्, स्तनद्वयम्=कुचद्वयम्, तुङ्गम्=उन्नतमिव वर्त्तते, तथा नाभिः, निम्ना=गभीरा इव, स्थिता, वलयः=उदरगता मांसतरङ्गाश्च, विषमोन्नताः=उच्चावचाः, दृश्यन्ते= आलक्ष्यन्ते, अङ्गे=अवयवे (गात्रे), इदं=दृश्यमानम्, मार्दवम्=कोमलता च, चिरं प्रतिभाति= स्थायिभावेन दृश्यते, प्रेम्णा=अनुरागेण, मन्मुखम्=ममाननम्, ईषत्=लज्जया किञ्चिदल्पम्, ईक्षत इव=वक्रदृष्ट्या पश्यतीव, तथा स्मेरा=हास्यव्याजेन च सती, मां वक्तीव=किमपि मन्दमालपतीव प्रतिभाति। अत्रोत्प्रेक्षालङ्कारः, शार्दूलविक्रीडितं वृत्तम्॥ १६ ॥

भावार्थः—समतलचित्राधारे चित्रितमपि अस्याः अनुकृतिः तद्वदेव प्रतीयते। तथाहि अस्याः स्तनद्वयम् उन्नतमिव वर्त्तते, नाभिः निम्नेव स्थिता, वलयश्च विषमोन्नता आलक्ष्यन्ते। गात्रे मार्दवं स्थायिभावेन वर्तत इव दृश्यते। अनुरागेण मन्मुखं किञ्चिदल्पं पश्यतीव तथा स्वाधराङ्कित-हासव्याजेन मां किमपि मन्दमालपतीव प्रतिभाति॥ १६ ॥

जैसे कि—

यद्यपि चित्रफलक समतल है तथापि शकुन्तला के दोनों स्तन कुछ ऊँचे हैं और नाभि गम्भीर-सी प्रतीत होती है। स्निग्धता के कारण अङ्गों में कोमलता स्थायीरूप से दिखायी देती है और ऐसा प्रतीत होता है कि अनुरागपूर्वक यह थोड़ा-थोड़ा मुझे देखती हुई मुस्कराकर मुझसे कुछ कह रही हो॥ १६ ॥

मिश्रकेशी—पश्चात्ताप से बढ़े हुए स्नेह के कारण शकुन्तला के प्रति इस प्रकार का बहुमान उपयुक्त ही है।

For example—

Though this picture-board is equal, yet the breasts of Śakuntalā appear lifted and the navel (cavity) as very deep. Due to oiliness, tenderness appearing over all the limbs and also it seems as if this observing my face a little and utters some thing with a sweat smile (to me.) (16)

राजा—(निःश्वस्य)

साक्षात् प्रियामुपगतामपहाय पूर्वं
चित्रार्पितामहमिमां बहुमन्यमानः।
स्त्रोतोवहां पथि निकामजलामतीत्य
जातः सखे! प्रणयवान् मृगतृष्णिकायाम्॥ १७॥

मिश्रकेशी—एवं=चित्रगताया अपि शकुन्तलाया बहुमानम्, पश्चात्तापेन=अनुतापेन, गुरोः=वृद्धिगतस्य, पश्चात्तापगुरोः, स्नेहस्य=अनुरागस्य, सदृशम्=अनुरूपम् (उपयुक्तम्)।

राजा—(निःश्वस्य=दीर्घमुष्णं च निश्वासमुत्सृज्य)

अन्वयः—हे सखे! अहं पूर्वं साक्षात् उपगतां प्रियाम् अपहाय इमां चित्रार्पितां बहुमन्यमानः पथि निकामजलं स्त्रोतोवहाम् अतीत्य मृगतृष्णिकायां प्रणयवान् जातः (अस्मि)॥ १७॥

साक्षादिति। हे सखे=हे मित्र! अहं=दुष्यन्तः, पूर्वम्=अव्यवहितसमये न तु कालान्तरे, साक्षात्=प्रत्यक्षेण, उप=समीपे, गताम्=प्राप्ताम्, उपगताम्, प्रियां=शकुन्तलाम्, अपहाय=अवगणय्य (न तु त्यक्त्वा, त्यक्तस्य पुनरुपादाने महापुरुषस्यानौचित्यप्रसङ्गात्), इमां=पुरोदृश्यमानाम्, चित्रार्पिताम्=चित्राङ्किताम् (प्रियाम्), बहुमन्यमानः=आद्रियमाणः, पथि=गमनमार्गे, निकामजलाम्=सम्पूर्णोदकाम्, स्त्रोतोवहाम्=नदीम्, अतीत्य=अतिक्रम्य, मृगतृष्णिकायाम्=नदीवदाभासमानायां मरुमरीचिकायाम्, प्रणयवान्=प्रीतियुक्तः, जातः=संवृत्तोऽस्मि। अत्र निदर्शनालङ्कारः, वसन्ततिलका वृत्तम्॥ १७॥

भावार्थः—यथा प्रथमं मार्गे उपस्थितां महानदीमुत्तीर्य गतवतः—पिपासोर्मृगतृष्णिकायां प्रणये जलावाप्तिस्तु न भवति परन्तु पिपासामात्रं वर्द्धते तथा प्रथमं स्वयमुपनतां प्रियामवधीरितवतो मम आलेखगतायां तस्यां च प्रणये मनःशान्तिस्तु नैव भवति परन्तु कामव्यथामात्रं वर्द्धत इति भावः॥ १७॥

राजा—(साँस भरकर)

प्रिया शकुन्तला उस समय स्वयं आकर उपस्थित हुई थी, किन्तु मैंने उसका परित्याग कर दिया था और अब इस चित्रांकित शकुन्तला का अतिशय आदर कर रहा हूँ। हे मित्र! (मेरा यह कार्य ऐसा ही है) मानो मैं अगाध जलवाली नदी का परित्याग कर मरुमरीचिका के जल के लिए प्रार्थना कर रहा हूँ॥ १७॥

Miśrakeśī—This is befitting an affection, grown intense through remorse.

The king—(With a sigh)

Having previously abandoned my beloved who had arrived in person and again thinking highly of her who is now committed to a picture, have become, O friend! possessed of a longing for the mirage, after having crossed on my way a river of plentiful water. (17)

विदूषकः—भोः! तिणिआ आइदिओ दीसंति, सव्वाओ ज्जेव दंसणीआओ, ता कदमा एत्थ तत्थमोदी सउंतला? [**भो! तिस्र आकृतयो दृश्यन्ते, सर्वा एव दर्शनीयाः, तत् कतमाऽत्र तत्रभवती शकुन्तला?**]

मिश्रकेशी—अणहिणो क्खु एसो सहीएरूवस्स मोहचक्खु, इअं क्खु ण से गदा पच्चक्खदं। [**अनभिज्ञः खल्वेष सखीरूपस्य मोघचक्षुः, इयं खलु नास्य गता प्रत्यक्षताम्।**]

राजा—त्वं तावत् कतमां तर्कयसि।

विदूषकः—(निर्वर्ण्य) तक्केमि जा एसा सिढिलबंधणुव्वंतकुसुमेण केसहत्थेण बद्धसेअविंदुणा अवणेण विसेसदो णमिदंसआहिं बाहुलदाहिं उच्चलिदणीविणा वसणेण अइसीपरिस्संता विअ अहिसेअसिणिद्धदरपल्लवस्स बालचूअरुक्खस्स पास्से आलिहिदा, एसा तत्थभोदी सउंतला, इदराओ सहीओ त्ति। [**तर्कयामि यैषा शिथिलबन्धनोद्वान्तकुसुमेन केशहस्तेन बहुस्वेदबिन्दुना वदनेन विशेषतो नमितांसकाभ्यां बाहुलताभ्याम् उच्चलितनीविना**

विदूषकः—भोः=भो मित्र! तिस्रः=त्रिसंख्याकाः, आकृतयः=प्रतिकृतयः, दृश्यन्ते, सर्वा एव=सकला एव, दर्शनीयाः=अवलोकनीयाः (रूपवत्यः), तत्=तस्मात्, अत्र=आसु मध्ये, कतमा=का, तत्रभवती=मान्या, शकुन्तला?

मिश्रकेशी—एषः=विदूषकः, सखीरूपस्य=शकुन्तलारूपस्य, अनभिज्ञः=अनुभवाक्षमः, अत एव मोघं=शकुन्तलाया अदर्शनान्निरर्थकम्, चक्षुर्यस्य सः मोघचक्षुः (अस्ति), इयं=शकुन्तला, अस्य=विदूषकस्य, प्रत्यक्षताम्=प्रत्यक्षविषयताम्, न गता=न प्राप्ता अद्यावधि इति यावत्। अनेन शकुन्तला पूर्वं न दृष्टा किम्? अत एवायमनभिज्ञः, इति भावः।

राजा—तावत् कथय, त्वम्=भवान्, कतमाम्=आसां मध्ये कां शकुन्तलामिति, तर्कयसि=मन्यसे?

विदूषकः—(निर्वर्ण्य=प्रतिकृतिः निरीक्ष्य) या एषा=पुरोदृश्यमाना, शिथिलबन्धनेन=

विदूषक—(इसमें) तीन आकृतियाँ दिखायी दे रही हैं और सभी दर्शनीय भी हैं, अतः (बतलाइए) इनमें से कौन-सी शकुन्तला है?

मिश्रकेशी—इसने मेरी सखी का रूप नहीं देखा है अतः इसके नेत्र निष्फल हैं। यह इसके सामने कभी नहीं आई है।

राजा—अच्छा, तुम इनमें से किसे शकुन्तला समझते हो?

विदूषक—(**देखकर**) मेरे विचार में जिसके शिथिल केशपाश से फूल गिर पड़े हैं, मुख पर पसीने की बूँदें झलक रही हैं, कन्धे झुके हुए-से दिखायी पड़ रहे हैं, नीवीवन्ध

Jester—Oh, three ladees are seen in this picture-board and all are beautiful. Which is her ladyship Śakuntalā here?

Miśrakeśī—Ignorant indeed of such beauty (of my friend), this person (i.e. Jester) has his sight in vain.

The king—Well! whom do you guess to be Śakuntalā?

Jester—I guess that she who is here painted, as though a little fatigued, by the side of the mango-tree, whose fresh foliage is (cluster

वसनेन च ईषत् परिश्रान्तेव अभिषेकस्निग्धतरपल्लवस्य बालचूतवृक्षस्य पार्श्वे आलिखिता, एषा तत्रभवती शकुन्तला, इतरे सख्यौ इति।]

राजा—निपुणो भवान्। अस्त्यत्र ममापि भावचिह्नम्—

स्विन्नाङ्गुलिविनिवेशाद् रेखा प्रान्तेषु दृश्यते मलिना।
अश्रु च कपोलपतितं लक्ष्यमिदं वर्णकोच्छ्वासात्॥ १८॥

बन्धनस्य शिथिलतया, उद्वान्तानि=निर्गलितानि, कुसुमानि=पूर्वविन्यस्तानि पुष्पाणि, यस्मात् तेन शिथिलबन्धनोद्वान्तकुसुमेन, केशहस्तेन=केशकलापेन, उपलक्षिता, बद्धाः=धृताः, स्वेदस्य=घर्म्मजलस्य, बिन्दवो येन तेन बद्धस्वेदबिन्दुना, वदनेन=मुखेन, उपलक्षिता, विशेषतः=अतिशयेन, नमितौ=नम्रीभूतौ, अंसौ=स्कन्धौ, ययोस्ताभ्यां नमितांसकाभ्याम्, बाहुलताभ्याम्=भुजलताभ्या-मुपलक्षितौ। तथा उच्चलिता=श्रमकाले विचलिता, नीविः=कटिवस्त्रग्रन्थिः, यस्य तेन उच्चलित-नीविना, वसनेन=वस्त्रेण च उपलक्षिता, ईषत्=अल्पं, परिश्रान्ता=जलसेककरणेन श्रमार्त्तेव, अभिषेकेण=जलसेकेन, स्निग्धतराणि=अतिशयेन मसृणानि, पल्लवानि=पत्राणि, यस्य तस्य अभिषेकस्निग्धतरपल्लवस्य, बालचूतवृक्षस्य=क्षुद्रआम्रवृक्षस्य, पार्श्वे=समीपस्थप्रदेशे, आलिखिता=चित्राङ्किता, एषा=पुरश्चित्रे दृश्यमाना, तत्रभवती=मान्या, शकुन्तला, इतरे=अपरे, सख्यौ इति तर्कयामि।

राजा—निपुणः=वस्तुनिर्णयकुशलः, भवान्=त्वम्, अत्र=चित्रगतायामत्रभवत्याम्, ममापि =दुष्यन्तस्य अपि, भावयोः=सात्त्विकभावयोः, चिह्नम्=भावचिह्नम् अस्ति।

अन्वयः—स्विन्नाङ्गुलिविनिवेशात् प्रान्तेषु मलिना रेखा दृश्यते। वर्णकोच्छ्वासात् कपोलपतितम् इदम् अश्रु च लक्ष्यम्॥ १८॥

स्विन्नाङ्गुलीति। स्विन्नायाः=चित्रणकाले कामविकाराविर्भावात् स्वेदार्द्रायाः, अङ्गुलेः=

शिथिल पड़ गया है और जो कुछ थकी हुई-सी दिखायी पड़ रही है, अभिषेक (सींचने) के कारण जिसके पत्ते अतीव स्निग्ध प्रतीत हो रहे हैं ऐसे आम के निकट चित्रित ही मान्या शकुन्तला हैं और अन्य सखियाँ।

राजा—आप बहुत चतुर हैं, (परन्तु) इस चित्र में भी मेरे भावचिह्न अंकित हैं—

सात्त्विक भाव उदय होने से स्वेदार्द्र अंगुली रखने के कारण चित्र के प्रान्तभाग में नीली रेखा दीख रही है और मेरे आँसू टपक जाने से चित्र का रङ्ग कुछ फैल गया है जिससे कपोल पर आँसुओं की स्थिति भी झलक रही है॥ १८॥

---

of leaves) glistening (shining) through the sprinking of water, with a mass of hair from which flowers have dropped down owing to the loosened braid, with a face covered with drops of perspiration and especially with arms much dropping, she is Śakuntalā, the others are friends.

The king—Clever you are. Here is a sign of my passion.

The soild impression of my perspiring finger is observed on the edges of the picture and here my tear, that dropped on her cheak, is noticeable owing to the puff of the paint. (18)

(चेटीं प्रति।) चतुरिके! अर्द्धलिखितमेतद्विनोदस्थानमस्माभिः, तद्गच्छ वर्त्तिकास्तावदानय।

चेटी—अज्ज! माहव्व! अवलंब चित्तफलअं, जाव आअच्छामि। **[आर्य! माधव्य! अवलम्बस्व चित्रफलकम्, यावदागच्छामि।]**

राजा—अहमेवावलम्बे। (इति यथोक्तं करोति।)

(चेटी निष्क्रान्ता।)

ममाङ्गुलेः, विनिवेशात्=चित्रफलके विन्यासात्, स्विन्नाङ्गुलिविनिवेशात्, प्रान्तेषु=शकुन्तलाप्रतिकृतिरेखोपान्तेषु, मलिना=कराङ्गुलिवर्त्तिकोच्छ्वासात् श्यामा, रेखा दृश्यते। वर्णकस्य=चित्रस्थरञ्जनवर्णस्य, उच्छ्वासात्=सर्वतः किञ्चित् प्रसरणात्, वर्णकोच्छ्वासात्, कपोलात्=ममैव गण्डस्थलात्, पतितम्=च्युतम्, इदम् अश्रु=एतन्नयनजलञ्च, लक्ष्यम्=ऊह्यम्, अनुमानेनावगन्तव्यम्। पाठान्तरे—'दृश्यमिदं वर्त्तिकोच्छ्वासात्' इति। अत्र स्वभावोक्तिरलङ्कारः। आर्य्या जातिः ॥ १८ ॥

भावार्थः—यद्यपि त्वं वस्तुनिर्णये कुशलस्तथापि मम सात्त्विकभावानां चिह्नविशेषात् एव भवद्भिर्दर्शितं स्वकीयनैपुण्यं शकुन्तलापरिज्ञाने यतः कामविकाराविर्भावात् स्विन्नाङ्गुलिविनिवेशात् शकुन्तलाप्रतिकृतिरेवोपान्तेषु मलिना रेखा दृश्यते। चित्रस्थरञ्जनवर्णस्य सर्वतः किञ्चित् प्रसरणात् ममैव गण्डस्थलात् च्युतम् एतन्नयनजलञ्च अनुमानेनावगन्तव्यं केनापि धीमता इति भावः ॥ १८ ॥

(चेटिं प्रति=गृहसेविकामुद्दिश्य) चतुरिके=चेट्या नाम, एतद् विनोदस्थानम्=विरहयापनस्थानम् (आलेख्यम्), अस्माभिः=मया, अर्द्धलिखितम्=तदानीमवसरसङ्कोचादसम्यक्चित्रितम्। तत्=तस्मात्, गच्छ=याहि, तावत्=यावदहं पृष्ठभूमिं विचारयामि, वर्त्तिका=तूलिका, आनय=प्रापय।

चेटि—आर्य माधव्य! (विदूषकसम्बोधनम्) चित्रफलकम्=चित्रपटम्, अवलम्बस्व=धारय, यावदागच्छामि=मदागमनपर्य्यन्तमित्यर्थः।

राजा—अहमेवावलम्बे=स्वविनोदार्थमिति। (इति=इत्युक्त्वा, तथा करोति=चित्रफलकमवलम्बते)

(चेटी=दासी, निष्क्रान्ता=निर्गता)

(दासी से) चतुरिके! यह चित्रफलक जो मेरे मनोविनोद का साधन है, अभी अधूरा है अतः जाकर कूची ले आओ।

चेटि—आर्य माधव्य! आप जरा इस चित्रफलक को सम्हालिए, तब तक मैं आती हूँ।

राजा—मैं ही इसे थामे रहूँगा। **(यथावत् करता है)**

(चेटी का प्रस्थान)

(To maidservent) Chaturike—this source of my diversion is half drawn. Go and just bring the brush.

Maid—Honourable Mādhavya! hold the picture-board till I come back.

The king—I shall myself hold it. *(Does as said)*

(Exit-maid)

विदूषकः—भो! किं एत्थ अवरं आलिहिदव्वं? [**भोः! किमत्रापरमालिखितव्यम्?**]

मिश्रकेशी—जो जो पिअसहीए अहिमदो पदेसो, तं तं आलिहिदुकामो त्ति तक्केमि। [**यो यः प्रियसख्या अभिमतः प्रदेशः, तं तमालिखितुकाम इति तर्कयामि।**]

राजा—सखे! श्रूयताम्—

कार्या सैकतलीनहंसमिथुना स्रोतोवहा मालिनी,
पादास्तामभितो निषण्णचमरा गौरीगुरोः पावनाः।
शाखालम्बितवल्कलस्य च तरोर्निर्मातुमिच्छाम्यधः,
शृङ्गे कृष्णमृगस्य वामनयनं कण्डूयमानां मृगीम्॥ १९॥

विदूषकः—अत्र=चित्रफलके, किमपरं=किमन्यत् आलिखितव्यम्=चित्रयितव्यमस्तीति शेषः।

मिश्रकेशी—प्रियसख्याः=शकुन्तलायाः, यः यः, प्रदेशः=अवयवः (क्षेत्रविशेषः), अभिमतः=रमणीयत्वेन सम्मतः, तं तम्, आलिखितुकामः=लिलिखिषतीति, तर्कयामि=सम्भावयामि, तस्य तस्यासद्भावादिति शेषः।

राजा—सखे!=मित्र! श्रूयताम्=आकर्ण्यताम्—

अन्वयः—सैकतलीनहंसमिथुना मालिनी स्रोतोवहा कार्य्या। ताम् अभितः निषण्णचमराः पावनाः गौरीगुरोः पादाः (कार्य्या)। शाखालम्बितवल्कलस्य तरोः अधः कृष्णमृगस्य शृङ्गे वामनयनं कण्डूयमानां मृगीं निर्म्मातुम् इच्छामि॥ १९॥

कार्य्येति। सैकतेषु=बालुकामयपुलिनेषु, लीनानि=अवस्थितानि, हंसमिथुनानि=हंसानां द्वन्द्वानि, यस्याः सा सैकतलीनहंसमिथुना, मालिनी=तन्नाम्नी, स्रोतोवहा=नदी, कार्य्या=चित्रयितव्या, तां=मालिनीम्, अभितः=पार्श्वतः, निषण्णाः=उपविष्टाः, चमराः=मृगविशेषाः (केचित्तु—चमरनामधेया पर्वतीयगौ इति), येषु ते निषण्णचमराः, पावनाः=पवित्राः, गौर्य्याः=शिवायाः, गुरोः=पितुः

विदूषक—मित्र! अभी इसमें और क्या कुछ चित्रित करना है?

मिश्रकेशी—मेरा विचार है कि मेरी प्रिय सखी को जो-जो प्रदेश प्रसन्द थे (अथवा उसके जो-जो अवयव इन्हें विशेषतः पसन्द थे) उन्हें ही ये चित्रित करना चाहते हैं।

राजा—मित्र! सुनो—

मैं इस चित्रपट्ट में हंसयुगल से सेवित मालिनी नदी, चमरी गौओं (चमर मृगों) से सेवित हिमालय की तलहटी, शाखाओं पर सूखते हुए वल्कलों से युक्त वह वृक्ष जिसके नीचे

Miśrakeśī—The places which were favourite to my dear friend (or the limbs which were more agrecable to his majesty), them only he wants to draw (add) in this picture-board.

The king—Friend! hear—

The river Mālinī is to be drawn with pair of swans resting on its sandy banks, (and) on both sides of it (are to be painted) the sacred adjoining hills of the Himālaya, the father of Gaurī, with

विदूषकः—(स्वगतम्) जधा मंतेदि तधा तक्केमि पूरिदव्वं अणेण चित्तफलअं आकिदिहिं लंबकुच्चाणं वक्कलपरिहाणं तावसाणं त्ति। [**यथा मन्त्रयति तथा तर्कयामि पूरयितव्यमनेन चित्रफलकमाकृतिभिः लम्बकूर्च्चानां वल्कलपरिधानानां तापसानामिति।**]

राजा—वयस्य! अन्यच्च शकुन्तलायाः प्रसाधनमभिप्रेतं लेखितुं विस्मृतमस्माभिः।

हिमालयस्य, पादाः=प्रत्यन्तपर्वताः, कार्य्या, तथा शाखासु लम्बितानि=अवसक्तानि, वल्कलानि=तपस्विनां वसनभूतानि, यस्य तस्य शाखालम्बितवल्कलस्य, तरोः=कस्यचिद्वृक्षस्य, अधः=तलप्रदेशे, कृष्णमृगस्य=कृष्णसाराख्यहरिणस्य, शृङ्गे=विषाणे, वामनयनं=निजं कामनेत्रं, कण्डूयमानां=खर्जनं कुर्वतीम्, मृगीं=हरिणीञ्च, निर्म्मातुम्=चित्रयितुम्, इच्छामि। अत्र तुल्य-योगिता-स्वभावोक्ति-उदात्तादयोऽलङ्काराः। शार्दूलविक्रीडितं वृत्तम्॥ १९॥

भावार्थः—पद्येऽस्मिन् आश्रमस्थं पूर्वानुभूतं दृश्यं स्मरति कथयति च अहं पुरोदृश्यमाने अस्मिन् चित्रफलके सैकतलीनहंसमिथुना मालिनीनदीं, तामभितः निषण्णचराः पावनाः हिमालयस्य प्रत्यन्तपर्वताः, तथा शाखालम्बितवल्कलस्य वृक्षस्य अधःप्रदेशे कृष्णसारमृगस्य शृङ्गे स्वकीयवामनयनं कण्डूयमानां मृगीं चित्रयितुमिच्छामि॥ १९॥

विदूषकः—(स्वगतम्=स्वमनसि, परोक्षे वा) राजा, यथा=यत्प्रकारम्, मन्त्रयति=विवेचयति, तथा=तेन प्रकारेण, तर्कयामि=सम्भावयामि अहमिति शेषः। अनेन=राज्ञा, लम्ब-कूर्चानाम्=दीर्घश्मश्रूणाम्, वल्कलं=वृक्षत्वगेव, परिधानं=वस्त्रं, येषां तेषां वल्कलपरिधानानां, तापसानाम्=आश्रमस्थतपस्विजनानाम्, आकृतिभिः=प्रतिकृतिभिः, चित्रफलकं=चित्रपट्टम्, पूरयितव्यम्=चित्रणीयम् इति तर्कयामि।

राजा—वयस्य=मित्र! अन्यच्च=अपरमपि, शकुन्तलायाः=मम प्रियसख्याः, प्रसाधनम्=वेशरचनम्, अभिप्रेतं=प्रकृतलेख्यतयाऽवधारितम्, लेखितुम्=चित्रयितुम्, अस्माभिः= मया (आदरे) विस्मृतम्।

बैठे हुए कृष्णसार मृग के सींग से मृगी अपनी बायीं आँख खुजा रही हो, चित्रित करना चाहता हूँ॥ १९॥

विदूषक—(स्वगत) जैसा ये कह रहे हैं उससे प्रतीत होता है कि ये लम्बी दाढ़ी वाले वल्कलधारी तपस्वियों की आकृति से चित्रफलक को भर देंगे।

राजा—मित्र! मैंने शकुन्तला के और भी वेश-विन्यास युक्त रूप चित्रित करने की इच्छा की थी किन्तु वे अब विस्मृत हो गये।

---

deer reclining on them and under a tree, possessing bark garments suspended from its branches I desire to represent (to create) a doe (female deer) rubbing her left eye on the horn of a black antelope. (19)

Jester—(To himself) As for as I guess, he should fill the picture-board with multitudes of long bearded bearing bark garments, hermits.

King—Friend! And another thing, a decoration of Śakuntalā, which was intended to be drawn here, was forgotten by us.

विदूषकः—किं विअ ? [**किमिव ?**]

मिश्रकेशी—वणवासस्स कणआभावस्स अ जं सरिसं भविस्सदि। [**वनवासस्य कन्यकाभावस्य च यत् सदृशं भविष्यति।**]

राजा—

कृतं न कर्णार्पितबन्धनं सखे! शिरीषमागण्डविलम्बिकेशरम्।
न वा शरच्चन्द्रमरीचिकोमलं मृणालसूत्रं रचितं स्तनान्तरे॥ २०॥

विदूषकः—किमिव=किं तत्प्रसाधनम्, इवेति वाक्यालङ्कारे।

मिश्रकेशी—यत् प्रसाधनम्, वनवासस्य सदृशं पुष्पमयाभरणधारणम्, कन्यकाभावस्य च=सदृशसीमन्तसिन्दूरादिधारणं च, सदृशं भविष्यति। (क्वचित् पुस्तके 'सौकुमार्यस्य अविनयस्य' इत्यधिकपाठो दृश्यते।)

राजा—

अन्वयः—सखे! कर्णार्पितबन्धनम् आगण्डविलम्बिकेशरं शिरीषं न कृतम्, (तथा) स्तनान्तरे शरच्चन्द्रमरीचिकोमलं मृणालसूत्रं न वा रचितम्॥ २०॥

कृतमिति। हे सखे! कर्णयोः अर्पितं=निवेशितं, बन्धनं=वृन्तं, यस्य तं कर्णार्पितबन्धनम्, तथा आगण्डं=कपोलपर्यन्तम्, विलम्बिनः=लम्बमानाः, केशराः=किञ्जल्काः, यस्य तत् आगण्डविलम्बिकेशरम्, शिरीषं=तदाख्यपुष्पम्, न कृतम्=न चित्रितम् (विस्मरणादिति भावः), तथा स्तनान्तरे=स्तनयोरभ्यन्तरे, शरच्चन्द्रस्य=शरदिन्दोः, मरीचिवत् कोमलं=सुकुमारम्, शरच्चन्द्रमरीचिकोमलम्, मृणालसूत्रम्=मृणालमयो हारः, न वा रचितम्=विस्मरणान्न वा चित्रितम्। अत्र क्रिययोः समुच्चितत्वात् समुच्चयालङ्कारः। वंशस्थविलं वृत्तम्॥ २०॥

भावार्थः—हे सखे! मया कर्णार्पितबन्धनम् आगण्डविलम्बिकेशरं शिरीषं तथा स्तनान्तरे शरच्चन्द्रमरीचिकोमलं मृणालसूत्रम् एतदुभयं विस्मरणवशान्न चित्रितं सम्प्रति तच्चित्रयितुमिच्छामीति भावः॥ २०॥

विदूषक—किस प्रकार के ?

मिश्रकेशी—जो रूप वनवास और कन्या भाव के अनुरूप होता।

राजा—हे सखे! मैंने जिसका मूल भाग कानों में बँधा हुआ हो तथा केसर कपोल पर झलक रहे हों ऐसा सिरीष पुष्प चित्रित नहीं किया तथा शरत्कालीन चन्द्रमा के समान उज्ज्वल मृणाल का हार भी इसके स्तनों के मध्य चित्रित नहीं किया है॥ २०॥

Jester—What possibly?

Miśrakeśī—Some thing that will be appropriate to her forest residence, tenderness and modesty or early married position.

The King—O' friend! a Śirīṣa flower, with its stalk placed on her ear and its filments hanging down to the cheeks, has not been drawn, nor has a necklace of lotus-fibres, delicate like the rays of the autumnal moon been formed in the interval of her breasts. (20)

विदूषकः—किं णु क्खु तत्थभोदी रत्तकुवलअसोहिणा अग्गहत्थेन मुहं आवारिअ चकिदचकिदा विअ ट्ठिदा। (सावधानं दृष्ट्वा) आ ही ही भो! एसो दासीए पुत्तो कुसुमरसपाडच्चरो टुट्टमहुअरो तत्थभोदीए वअणकमलं अहिलसदि। **[किन्नु खलु तत्रभवती रक्तकुवलयशोभिना अग्रहस्तेन मुखमावार्य चकितचकितेव स्थिता। आ ही ही भोः! एष दास्याः पुत्रः कुसुमरसपाटच्चरो दुष्टमधुकरस्तत्रभवत्या वदनकमलमभिलषति।]**

राजा—ननु वार्यतामेष धृष्टः।

विदूषकः—भो! तुमं ज्जेव अविणीदाणं सासिदा इमस्स वारणे पहवसि। **[भोः! त्वमेव अविनीतानां शासिता अस्य वारणे प्रभवसि।]**

विदूषकः—किन्नु खलु इति प्रश्ने, तत्रभवती=मान्या शकुन्तला, रक्तकुवलयमिव= रक्तोत्पलमिव, शोभते इति तेन रक्तकुवलयशोभिना, अग्रहस्तेन=हस्ताग्रेण, मुखम्=स्ववदनम्, आवार्य्य=आच्छाद्य, चकितात्=भीतादपि, चकिता=भीता, अतिभीता, इवेति सम्भावनायाम्, स्थिता। (सावधानं=निपुणम्, निरूप्य=दृष्ट्वा) आ इति क्रोधे, ही-ही इति विस्मये, भो इति सम्बोधने, एषः=सम्मुखस्थः, दास्याः पुत्रः=नीचः, कुसुमरसस्य=पुष्पमधुनः, पाटच्चरः=चौरः, कुसुमरसपाटच्चरः, दुष्टमधुकरः=दुष्टभ्रमरः, तत्रभवत्याः=मान्यायाः शकुन्तलायाः, वदनकमलम्=मुखपङ्कजम्, अभिलषति=कामयते। मुखं पद्मबुद्ध्याऽभिलषतीति भावः।

राजा—नन्विति सम्बोधने, धृष्टः=प्रगल्भः, एषः=मधुकरः, वार्य्यताम्=ताड्यताम्।

विदूषकः—भो=वयस्य! त्वमेव, अविनीतानाम्=दुर्वृत्तानाम्, धृष्टानाम्, शासिता=शासनकर्त्ता, अतः त्वमेव, अस्य=धृष्टभ्रमरस्य, वारणे=अपसारणे, ताडने, प्रभवसि=वारयितुं समर्थः, न त्वहम्।

विदूषक—यहाँ शकुन्तला रक्तकमल सदृश कराग्रभाग से अपना मुखमण्डल छिपाकर मानो डरी हुई-सी बैठी है। **(भली प्रकार देखकर)** ओ हो हो! यह नीच पुष्परस का चोर दुष्ट भ्रमर मान्या शकुन्तला के मुखकमल का पान करना चाहता है।

राजा—इस ढीठ भ्रमर को रोको।

विदूषक—मित्र! दुष्टों के शासक आप ही हैं अतः आप ही इसे रोकने में समर्थ हो सकते हैं।

Jester—Oh, why is it that her ladyship stands, as though very much frightened, having covered her face, with the front portion of her hand, which shines like a red lotus? *(Having observed closely)* Ah! here the whore-son, the bee, the robber of the honey of flowers is rushing at her ladyship's face, considering it as a lotus flower.

The king—Let this impudent fellow be warded off.

Jester—You alone, the chastiser of the undiciplined, will be able to drive it off.

राजा—युज्यते। अयि भोः! कुसुमलताप्रियातिथे! किमत्र परिपतनखेदमनुभवसि?

एषा कुसुमनिषण्णा तृषितापि सती भवन्तमनुरक्ता।
प्रतिपालयति मधुकरी न खलु मधु त्वां विना पिबति॥ २१॥

मिश्रकेशी—अदिअत्थं क्खु वारिदो। [**अत्यर्थं खलु वारितः।**]

विदूषकः—भो! पडिसिद्धवामा क्खु एषा जादी। [**भोः! प्रतिषिद्धवामा खलु एषा जातिः।**]

राजा—युज्यते=युक्तमेव, अयि भो! अयीति कोमलामन्त्रणे, भो इति सम्बोधने, कुसुम-प्रधाना लता कुसुमलता, तस्याः प्रियातिथे=प्रीतिकरातिथिस्वरूप! कुसुमलताप्रियातिथे! किं=किमर्थम्, अत्र=शकुन्तलामुखे, परिपतनखेदं=सञ्चरणपरिश्रमं, अनुभवसि=स्वीकरोषि? न खल्वियं कुसुमलता किन्तु शकुन्तलामुखमेव, अत्र परिपतने केवलं परिश्रम एव प्राप्स्यसीति भावः।

अन्वयः—कुसुमनिषण्णा भवन्तम् अनुरक्ता एषा मधुकरी तृषितापि सती प्रतिपालयति खलु त्वां विना मधु न पिबति॥ २१॥

एषेति। कुसुमनिषण्णा=पुष्पोपविष्टा, भवन्तं=त्वां प्रति, अनुरक्ता=अनुरागवती, एषा=पुरःस्थिता (चित्रलिखिता), मधुकरी=भ्रमरी, तृषिताऽपि=पिपासिताऽपि, सती, प्रतिपालयति=भवन्तं प्रतीक्षते। (ननु भ्रमरी मां प्रतिपालयतीति त्वया कथमवगम्यते?) उत्तरयति—खलु=यस्मात्, त्वां विना, मधु=पुष्परसं, न पिबति=नास्वादति। अत्र समासोक्तिरलङ्कारः, आर्य्या जातिः॥ २१॥

भावार्थः—भो भ्रमर! कुसुमनिषण्णा भवन्तमनुरक्ता एषा मधुकरी तृषिताऽपि त्वामेव प्रतिपालयति, त्वां विना पुष्परसमपि नास्वादति, तस्मात् तत्रैव ते परिपतनं नितान्तं समीचीनं न तु शकुन्तलामुखे इति भावः॥ २१॥

मिश्रकेशी—अत्यर्थं खलु=अतिशयेनैव, वारितः=प्रतिषिद्धः भ्रमरः।

विदूषकः—भो! हे सखे! एषा जातिः=भ्रमरजातिः, प्रतिषिद्धवामा=निषिद्धविषया-नुष्ठायिनी, खल्विति निश्चयेन (तस्य वारणे सत्यपि पुनस्तत्करणादिति भावः)।

राजा—ठीक है। हे पुष्पित लता के प्रिय अतिथि! तुम शकुन्तला के मुख को पुष्प समझ कर उस पर गिरने का परिश्रम क्यों उठा रहे हो?

पुष्प पर बैठी हुई आप पर अनुरक्त यह भ्रमरी प्यासी होने पर भी तुम्हारी प्रतीक्षा कर रही है, तुम्हारे बिना अकेली मधुपान नहीं करती॥ २१॥

मिश्रकेशी—वाह! आपने खूब रोका।

विदूषक—मित्र! यह भ्रमरजाति ऐसी है कि रोकने पर भी वही काम करती है।

The king—All right, oh! you! the favourite guest of creepers in flowers! why do you undergo the trouble of hovering (loctoring) about here?

Here the female bee, attached to you and seated on a flower, is waiting for you, though she is thirsty, indeed she does not drink the honey without you. (21)

Miśrakeśī—How cleverly he has been warded off.

Jester—Though prohibited, this class (the bees) perverse.

राजा-(सकोपम्) भोः न मे शासने तिष्ठसि, श्रूयतां तर्हि सम्प्रति हि—

अक्लिष्टबालतरुपल्लवलोभनीयं
पीतं मया सदयमेव रतोत्सवेषु।
बिम्बाधरं दशसि चेद् भ्रमर! प्रियाया-
स्त्वां कारयामि कमलोदरबन्धनस्थम्॥ २२॥

विदूषकः—भो एव्वं तिक्खदंडस्स दे कधं ण भाइस्सदि। (विहस्यात्मगतम्) एसो दाव उम्मत्तो, अहंपि एदस्स संगेण ईदिसो ज्जेव संवुत्तो। **[भोः! एवं तीक्ष्णदण्डस्य ते कथं न भेष्यति। एष तावदुन्मत्तः, अहमपि एतस्य सङ्गेन ईदृश एव संवृत्तः।]**

राजा—(सकोपम्-सक्रोधम्) भोः=इति भ्रमरसम्बोधनम्, (त्वम्) मे=मम, शासने= आज्ञायाम्, न तिष्ठसि=न वर्त्तसे। तर्हि=तदा, श्रूयताम्=आकर्ण्यताम्। सम्प्रति हि इत्यस्य श्लोके- नान्वयः—

अन्वयः—हे भ्रमर! अक्लिष्टबालतरुपल्लवलोभनीयं मया रतोत्सवेषु सदयमेव पीतं प्रियायाः बिम्बाधरं चेत् दशसि तदा त्वां कमलोदरबन्धनस्थं कारयामि॥ २२॥

हे भ्रमर! अक्लिष्टः=करस्पर्शादिनाऽदूषितोऽन्यास्पृष्टः, यो बालः=नूतनः, तरुपल्लवः= वृक्षपर्णः, तद्वल्लोभनीयं=मनोहरम्, अक्लिष्टबालतरुपल्लवलोभनीयम्, मया=दुष्यन्तेन, रतोत्सवेषु= सुरतोत्सवेषु, सदयमेव=अतिकोमलतया, पीतं=चुम्बितम्, प्रियायाः=शकुन्तलायाः, बिम्बाधरं= पक्वबिम्बफलसदृशमोष्ठम्, चेत्=यदि, दशसि=दन्तक्षतं करोषि, तदा त्वाम्, कमलोदरं= पद्माभ्यन्तरमेव, बन्धनं=कारागृहं, तत्र तिष्ठतीति तं कमलोदरबन्धनस्थम्, कारयामि=विधाप्यामि। अत्र अतिशयोक्तिः, समासोक्तिः, लुप्तोपमा, रूपकम्, श्लेषश्चालङ्काराः। वसन्ततिलकं वृत्तम्॥ २२॥

भावार्थः—भो भ्रमर! प्रियायाः यदधरं सुरतोत्सवेषु अपि मया अतीव कोमलतयैव चुम्बितं, तदेव प्रियायाः बिम्बाधरं यदि सम्प्रति त्वं दशसि, मम शासनमनादृत्य स्वेच्छाचरणं करिष्यसि तदा त्वां कमलोदररूपकारागारे बन्धनगतं करिष्यामि॥ २२॥

राजा—(**क्रोध से**) ओ भ्रमर! क्या तू मेरी आज्ञा नहीं मानता? यदि ऐसा है तो सुन—

अम्लान, नव किसलय के समान प्रिया के जिस सुन्दर अधरोष्ठ का मैंने रतिकाल में भी अतीव कोमलतापूर्वक पान किया था। हे भ्रमर! यदि अब तू उस बिम्बफल के समान अधर को निर्दयतापूर्वक काटेगा तो मैं तुझे कमलसम्पुट के कारागार में डाल दूँगा॥ २२॥

विदूषक—सखे! इस प्रकार तीक्ष्ण दण्ड देने वाले आप से वह क्यों न डरेगा? **(हँसकर मन में)** ये तो पागल हैं, मैं भी इनके संसर्ग से ऐसा ही हो चला हूँ।

The king—(With anger) O' bee! you do not conform to my command. Hear then now—

If, O, bee! you touch the Bimba-like lower lip of my beloved, which is attractive like the un injured young leaf of a tree and which was drunk only tenderly by me in festivals of love, I shall have you put in the prision of the hollow of a lotus.

राजा—निवार्यमाणोऽपि कथं स्थित एव।

मिश्रकेशी—अम्हो! धीरंपि जणं रसो विआरेदि। [**अहो! धीरमपि जनं रसो विकारयति।**]

विदूषकः—(प्रकाशम्) भो! चित्तं क्खु एदं! [**भोः चित्रं खल्वेतत्।**]

राजा—कथं चित्रम्?

मिश्रकेशी—अहं पि दाणिं अवगदत्था, किं उण जधाचिंतिदाणुसारी एसो। [**अहमपि इदानीमवगतार्था, किं पुनर्यथाचिन्तितानुसारी एषः।**]

विदूषकः—भोः, एवम्=उक्तरूपः, तीक्ष्णः=कठोरः, दण्डो यस्मात् तस्य=उग्रशासनस्य, ते=तव, कथं न भेष्यति=न भयं करिष्यति (सुकुमारोऽयं दण्ड इति भावः)। एषः=राजा, उन्मत्तस्तावत्=उन्मत्त एव, अहमपि, एतस्य=उन्मत्तस्य, सङ्गेन=संसर्गेण, ईदृश एव=उन्मत्त एव, संवृत्तः=सञ्जातः।

राजा—निवार्यमाणोऽपि=प्रतिषिध्यमानोऽपि, स्थित एव भ्रमरः इति कथम्?

मिश्रकेशी—अहो इति खेदानुभवे, रसः=प्रवासविप्रलम्भाख्यः शृङ्गारः, धीरमपि=स्वभावतो धैर्यशालिनमपि जनम्, विकारयति=अन्यथयति दूषयति वा (अत एव शकुन्तलाविप्रलम्भः अतिशयधैर्यशालिनमपि राजानं उन्मत्तं चकारेति भावः)।

विदूषकः—(प्रकाशम्=सुस्पष्टम्) भोः! चित्रम्=निर्जीवमालेख्यम्, खल्विति निश्चयेन, एतत्=दृश्यमानम्।

राजा—कथमिति सम्भ्रमे, चित्रम्=निर्जीवमालेख्यमात्रमेव?

मिश्रकेशी—अहम्=मिश्रकेशी अपि, इदानीम्=अस्मिन्नेव समये, अवगतः=चित्रत्वेन

राजा—मेरे रोकने पर भी यह यहीं स्थित है।

मिश्रकेशी—ओह! धैर्यशाली व्यक्ति को भी हृदयस्थ भाव विकारग्रस्त बना देता है।

विदूषक—(प्रकट) सखे! यह (केवल एक) चित्र है।

राजा—क्या यह चित्र है? (चित्र कैसे?)

मिश्रकेशी—मैं भी अब समझ पाई कि यह चित्र है, तब शकुन्तला के ध्यान में लीन ये ऐसा कर रहे हैं तो आश्चर्य ही क्या है?

Jester—How will he not fear one whose punishment is so severe? *(Laughing to himself)* As for him, he has gone mad. I too have become as though of similar condition (complexion) through association with him.

The king—Even after my warning this remains here only.

Miśrakeśī—Oh, a sentiment even spoils a couragious person.

Jester—(Aloud) Oh! it is only a picture.

The king—How picture?

Miśrakeśī—I too have now realised the fact. What of him

राजा—किमिदमनुष्ठितं पौरोभाग्यम् ?

दर्शनसुखमनुभवतः साक्षादिव तन्मयेन हृदयेन।
स्मृतिकारिणा त्वया मे पुनरपि चित्रीकृता कान्ता ॥ २३ ॥

(इति बाष्पं विसृजति।)

मिश्रकेशी—पुव्वापरविरुद्धो अपुव्वो एसो विरहिमग्गो। [**पूर्वापरविरुद्धः अपूर्व एष विरहिमार्गः।**]

ज्ञातः, अर्थः=मृगादिरूपं वस्तु, यया सा अवगतार्था, यथा चिन्तितानुसारी=मनसा यादृशं कल्पितं तत्त्वत एव तदनुसारी, एषः=राजा, पुनः किं=किं वक्तव्यः। (तथा च एकाग्रतया शकुन्तलां चिन्तयन् राजा तन्मयतया चित्रे तात्त्विकभावानां कर्त्तुमर्हत्येव यतः शकुन्तलाविषये तादृशचिन्ताशून्यापहमितः पूर्वं चित्रे तात्त्विकभ्रमवत्येवासमित्याशयः।)

राजा—किं=किमर्थम्, इदं पौरोभाग्यम्=दोषैकदर्शित्वम्, अनुष्ठितम्=आचरितम्। (चित्र इति कथनेन मम विरहदुःखमात्रमेव भवता उत्तेजितम् इति भावः।)

अन्वयः—तन्मयेन हृदयेन साक्षात् इव दर्शनसुखम् अनुभवतः मे स्मृतिकारिणा त्वया पुनरपि कान्ता चित्रीकृता ॥ २३ ॥

दर्शनेति। तन्मयेन=शकुन्तलामयेन, हृदयेन=मनसा (इयमेव मे प्रिया शकुन्तलेति बुद्ध्या), साक्षात्=प्रत्यक्षत इव, दर्शनसुखं=प्रियावलोकनानन्दम्, अनुभववतः=उपलभमानस्य, मे=मम, स्मृतिकारिणा=आलेख्यकान्तेयमिति स्मृतिं कारितवता, त्वया=भवता, पुनरपि=भूयोऽपि, कान्ता=मम प्रेयसी शकुन्तला, चित्रीकृता=ध्याने जीविताऽपि सा आलेख्यतया धीविषयीकृता। अत्र उत्प्रेक्षा, विरोधाभासः, स्मरणश्चालङ्काराः। आर्य्या जातिः ॥ २३ ॥

भावार्थः—आलेख्ये प्रकृतशकुन्तलां विभाव्य प्रत्यक्षदर्शनानन्दमनुभवतो मे सम्प्रति त्वत्कृतस्मरणेन भ्रमापगते सति चित्रमेवेदमिति तत्त्वावधारणान्महानेव विषादः समुत्पन्न इति त्वया पौरोभाग्यमेव स्वनुष्ठितमिति भावः ॥ २३ ॥

(इति=इत्युक्त्वा, बाष्पम्=अश्रूणि, मुञ्चति=विमुञ्चति।)

राजा—किसलिए तुमने यह मूर्खता की ?

मैं तन्मयतापूर्वक इस चित्र में मानो साक्षात् शकुन्तला का ही दर्शन कर रहा था परन्तु तुमने '**यह चित्र मात्र है**' यह स्मरण कराकर इसे चित्र ही बना दिया ॥ २३ ॥

(यह कहकर आँसू बहाता है)

मिश्रकेशी—पूर्वापर-विरुद्ध यह विरहियों का मार्ग असाधारण (अद्भुत) है।

---

who is experiencing what he has painted (under meditation of his beloved).

The king—Why this meddlesomeness has been perpetrated by you while, with my heart wholy absorbed in her, I was experiencing the pleasure of her sight, as though she were present before my eyes, you have, by reviving my recollection, again transformed my beloved into a picture. (23)

(These sheds tears) unprecedented is this cource of love.

राजा—वयस्य! कथमेवमविश्रामं दुःखमनुभवामि।

प्रजागरात् खिलीभूतस्तस्याः स्वप्नसमागमः।

बाष्पस्तु न ददात्येनां द्रष्टुं चित्रगतामपि॥ २४॥

मिश्रकेशी—सव्वधा पमज्जिदं तुए पच्चादेसदुक्खं पिअसहीए पच्चक्खं ज्जेव सहिजणस्स। [**सर्वथा प्रमार्जितं त्वया प्रत्यादेशदुःखं प्रियसख्याः प्रत्यक्षमेव सखीजनस्य।**]

मिश्रकेशी—पूर्वापरयोः=अतीतवर्त्तमानयोः कालयोः, विरुद्धः=परस्परविपरीतः, पूर्वापरविरुद्धः, एषः=दृश्यमानः, विरहिणः=वियोगिनः राज्ञः, मार्गः अवस्था=विरहिमार्गः, अपूर्वः= अभिनवः। (पूर्वं हि आस्थया प्रियायाः परिग्रहः पश्चाद् व्यभिचारिणीसम्भावनया अनास्थया परित्यागः पुनरिदानीं पतिव्रताज्ञानादास्थया पश्चात्ताप इति परस्परविरुद्धत्वमिति मन्तव्यम्।)

राजा—वयस्य! कथमेवं=केन प्रकारेण, अविश्राममम्=अनवरतं, दुःखमनुभवामि। सततदुःखं सोढुं न शक्नोमीत्यर्थः।

अन्वयः—प्रजागरात् तस्याः स्वप्नसमागमः खिलीभूतः तु बाष्पः चित्रगताम् एनां द्रष्टुं न ददाति॥ २८॥

प्रजागरादिति। प्रजागरात्=प्रकर्षेण जागरणाद्धेतोः, तस्याः=शकुन्तलायाः, स्वप्रसमागमः= स्वप्नावस्थायामपि सङ्गमः, खिलीभूतः=निरुद्धः। तु=पुनः, बाष्पः=नयनजलम्, चित्रगताम्=आलेख्यगतामपि, एनां=शकुन्तलां, द्रष्टुं न ददाति नयनावरणादिति भावः। अत्र हेतुरलङ्कारः, पथ्यावक्त्रं वृत्तम्॥ २४॥

भावार्थः—प्रजागरात् तस्याः शकुन्तलायाः स्वप्नावस्थायामपि सङ्गमः सर्वथैव निरुद्धः, पुनः नयनजलम् आलेख्यगतामपि एनां द्रष्टुं मां रुणद्धि॥ २४॥

मिश्रकेशी—सर्वथा=सर्वतोभावेन, सखीजनस्य=मम, प्रत्यक्षं=समक्षमेव, प्रियसख्याः=

मिश्रकेशी—पूर्वापर सम्बन्ध से विरहित विरही का यह मार्ग सर्वथा अपूर्व ही है।

राजा—मित्र! मैं इस प्रकार लगातार दुःख क्यों भोग रहा हूँ?

रात्रि में जागते रहने के कारण उस प्रियतमा के साथ स्वप्न में होने वाले मिलाप में भी रुकावट आ गई और अब ये आँसू चित्रगत शकुन्तला को भी देखने नहीं देते (इसमें भी रुकावट डाल रहे हैं)॥ २४॥

मिश्रकेशी—उसकी सखी अर्थात् मेरे सामने इस प्रकार अपना भाव प्रगट कर आपने शकुन्तला के त्याग का सारा दुःख दूर कर दिया।

Miśrakeśī—Unprecedented (Novel) is this course of love in as much as it involves a contradiction between what has preceded and what follows (i.e. the king's previous and subsequent conduct).

The king—Friend! how is it that I am facing pain contineuously?

Though conscious union with her is barred in a dream. Tears on the other hand do not permit me to behold her even when represented in a picture. (24)

चतुरिका—(प्रविश्य) जेदु जेदु भट्टा। वत्तिआकरंडअं गेण्हिअ इदो अहं पत्थिदम्हि। [**जयतु जयतु भर्त्ता! वर्त्तिकाकरण्डकं गृहीत्वा इतोऽहं प्रस्थिताऽस्मि।**]

राजा—ततः किम्?

चेटी—तं मे हत्थादो पिंगलिआवेदिआए देवीए वसुमदीए अहं ज्जेव अज्जउत्तस्स उवणइस्सं त्ति भणिअ सवलक्कारं गहीदं। [**तन्मे हस्तात् पिङ्गलिकावेदितया देव्या वसुमत्या अहमेवार्यपुत्रस्य उपनेष्यामीति भणित्वा सबलात्कारं गृहीतम्।**]

विदूषकः—तुमं कधं विमुक्का? [**त्वं कथं विमुक्ता?**].

शकुन्तलायाः, प्रत्यादेशेन=निराकरणेन, यदस्माकं दुःखं, तद्=प्रत्यादेशदुःखं, सखीजनस्य=मम, प्रत्यक्षं=समक्षमेव, प्रमार्जितम्=क्षालितम्, तद्दुःखादपि एवमधिकदुःखानुभवदर्शनात् इति भावः।

चतुरिका—(प्रविश्य=रङ्गे प्रवेशं विधाय) जयतु जयतु भर्त्ता=विजयतु अस्माकं प्रभुः। वर्त्तिकायाः=चित्रलेखनसाधनीभूतायाः तूलिकायाः, करण्डकं=पेटकम्, गृहीत्वा, अहम्=चेटी, इतः=अस्यां दिशि, भवदधिष्ठितप्रदेशे, प्रस्थितास्मि=चलितास्मि।

राजा—ततः किम्=ततः किं सञ्जातम्?

चेटी—तत्=वर्तिकाकरण्डकम्, मे=मम, हस्तात्=करात्, पिङ्गलिका=तदाख्या चेटी, तया आवेदितया=विज्ञापितया (अन्यां काञ्चिद् ललनां चित्रयितुं स्वामिनो नियोगाच्चतुरिका वर्त्तिकाकरण्डकं नयति इति विज्ञापिता), देव्या=कृताभिषेकया, वसुमत्या=तन्नामकराज्ञा कर्त्र्या, अहं=वसुमत्येव, आर्यपुत्रस्य=स्वामिनो दुष्यन्तस्य, उपनेष्यामि=समीपे प्रापयिष्यामि, इति=एतत्, भणित्वा=उक्त्वा, सबलात्कारं=हठकारितया (बलपूर्वकम्), मे=मम चतुरिकायाः, हस्तात्=करात्, तत्=वर्त्तिकाकरण्डकम्, गृहीतम्=नीतम्।

चतुरिका—(**प्रवेश कर**) महाराज की जय हो! जय हो! तूलिका की पेटी लेकर जब मैं इधर आ रही थी····।

राजा—तब क्या हुआ?

चेटी—'मेरे हाथ में कूची की पेटी है' इस बात की सूचना पिङ्गलिका दासी से पाकर पट्टमहिषी वसुमती—'मैं स्वयं उसे आर्यपुत्र के पास ले जाऊँगी' कहकर मुझसे बलपूर्वक वह पेटी छीन ले गई।

विदूषक—तब भला तुम कैसे छूटी?

Miśrakeśī—Showing your inner feelings thus before me, you have completly wiped off Śakuntalā's grief for repudiation.

Caturikā—*(Entering)* May our lord be victorious, be victorious. Having taken the box of brushes I had started in this direction....

The king—Then what happened?

Maid—That (brush-box) was on the way forcibly seized from my hand by queen Vasumatī, who was accompanied (informed) by Piṅgalikā saying—"I shall myself carry it to my lord."

चेटी—जाव देवीए लदाविडवलग्गं उत्तरीअंचलं पिंगलिआ मोआवेदि, दाव णिह्नविदो मए अप्पा। **[यावद् देव्या लताविटपलग्नम् उत्तरीयाञ्चलं पिङ्गलिका मोचयति, तावत् निह्नुतो मया आत्मा।]**

राजा—वयस्य! उपस्थिता देवी बहुमानगर्विता च; तत् भवानिमां प्रतिकृतिं रक्षतु।

विदूषकः—उत्ताणं पि किं त्ति ण भणासि। (चित्रफलकमादायोत्थाय च) जइ भवं अंतेउर-कूड-वागुरादो मुंचिस्सदि, तदो मं मेहच्छण्णप्पासादे सद्दाविस्सदि; एदं च तहिं गोवाएमि, जहिं पारावदं उज्झिअ अण्णो को वि ण पेक्खिस्सदि। **[आत्मानमपि किमिति न भणसि। यदि भवानन्तःपुरकूटवागुरातो मोक्ष्यते, तदा मेघाच्छन्नप्रासादे शब्दायिष्यते। इदञ्च तत्र गोपायामि, यत्र पारावतमुज्झित्वा अन्यः कोऽपि न प्रेक्षिष्यते।]** (इति द्रुतपदं निष्क्रान्तः)

विदूषकः—त्वम्, कथं=केनोपायेन, विमुक्ता=वसुमतीहस्तात् इति।

चेटी—लताविटपलग्नम्—लतायाः विटपे=शाखायां, लग्नम्=संसक्तम्, देव्याः=वसुमत्याः, उत्तरीयाञ्चलं=पूर्वकायांशुकम्, यावत्=यत्कालं, पिङ्गलिका=तन्नाम्नी चेटी, मोचयति=विटपाद् वियोजयति, तावत्=तस्मिन्नेवावसरे, मया, आत्मा=स्वदेहः, निह्नुतः=ततो निर्गमनाद् गोपायितः।

राजा—वयस्य=हे सखे! उपस्थिता=उपस्थितप्राया, देवी=वसुमती, सा च, बहुमानेन=मत्कृत-अत्यादरेण, गर्विता=जातगर्वा, बहुमानगर्विता, तत्=तस्मात्, भवान्=त्वम्, इमां=पुरतः स्थिताम्, प्रतिकृतिं=शाकुन्तलेयचित्रम्, रक्षतु=क्वचिद् गोपायतु उत एतां गृहीत्वा भवानपयातु।

विदूषकः—आत्मानम्=मामपि रक्षतु, इति=इत्थम्, किम्=कथं, न भणसि=कथयसि, यदि=चेत्, भवान्=त्वम्, अन्तःपुरम्=अवरोधवर्त्तिनी रमणी, सैव कूटवागुरा=यन्त्रमयमृगबन्धनोपायः, तस्याः अन्तःपुरकूटवागुरातः, मोक्ष्यते=परित्राणं प्राप्स्यति, तदा, मेघाच्छन्नप्रासादे=तन्नामकप्रासादविशेषे, शब्दायिष्यते=आमन्त्रयिष्यते (रहःस्थानतया तत्रैवाहं गच्छामीत्यभिप्रायः),

---

चेटी—तभी, जब तक पिङ्गलिका लताशाखा में उलझे हुए महारानी के उत्तरीय (दुपट्टे) को छुड़ाने लगी, इसी बीच में मैं छिप गई।

राजा—सखे! अधिक आदर पाने से गर्विता महारानी वसुमती इधर ही आ रही हैं, अतः (अब) तुम इस चित्र की रक्षा करो।

विदूषक—'अपनी भी रक्षा करो' ऐसा क्यों नहीं कहते। **(चित्रफलक लेकर और खड़ा होकर)** जब तुम अन्तःपुर (महारानी) के जाल से छूटो तो मुझे मेघाच्छन्न प्रासाद पर

Jester—Then how you were let off?

Maid servent—While Piṅgalikā was disengaging the queen's upper garment, stuck to the branch of a creeper, I took my self away or hid myself.

The king—Friend! the queen is at hand and she is proud of my great esteem of her. Do you therefore save this picture.

Jester—Why not you say—"Save your self too."*(Taking up the picture-board and rising)* If your majesty is let off from the deadly poison of the harem, then call me in the Megha-

मिश्रः—अम्हो! अण्णसंकंतहिअओ वि पढमसंभावणं रक्खदि, थिरसोहिदो दाव एसो। **[अहो! अन्यसंक्रान्तहृदयोऽपि प्रथमसम्भावनं रक्षति, स्थिरसौहृदस्तावदेषः।]**

प्रतीहारी—(प्रविश्य पत्रहस्ता) जेदु जेदु देवो। **[जयतु जयतु देवः।]**

राजा—वेत्रवति! न खल्वन्तरे त्वया दृष्टा देवी?

प्रतीहारी—देव! दिट्ठा, पत्तहत्थं मं पेक्खिअ पडिणिउत्ता। **[देव! दृष्टा, पत्रहस्तां मां प्रेक्ष्य प्रतिनिवृत्ता।]**

इदं=चित्रफलकम्, तव=तस्मिन् एकान्तस्थमेघाच्छन्नप्रासादे, गोपायामि=प्रच्छादयामि। यत्र=यस्मिन् स्थाने, पारावतं=कपोतम्, उज्झित्वा=त्यक्त्वा (विहाय), अन्यः कोऽपि जनः, न प्रेक्षिष्यते=नैव द्रष्टुं शक्ष्यति। (इति=एवं, द्रुततरं=क्षिप्रगत्या, निष्क्रान्तः=निर्गतः)।

मिश्रकेशी—अहो इति विस्मये, अन्यस्यां=नायिकायाम्, शकुन्तलायाम्, संक्रान्तं= संसक्तं, हृदयं=चेतः, यस्य सः अन्यसंक्रान्तहृदयः, अपि, प्रथमसम्भावनम्=पूर्वप्रणयम्, रक्षति, अत एव स्थिरं=दृढं, सौहृदं=प्रणयः, यस्य सः स्थिरसौहृदः, तावदेषः=सर्वथा प्रशंसनीय एवायमिति भावः।

(प्रविश्य=रङ्गे आगत्य, पत्रं हस्ते यस्याः सा पत्रहस्ता=पत्रं नीयमाना, प्रतिहारी=द्वार-रक्षिका) जयतु जयतु देवः=अस्माकं स्वामी विजयतु।

राजा—वेत्रवति! खल्विति प्रश्ने, त्वया=भवता, अन्तरे=पथि मध्ये, देवी=वसुमती, न दृष्टा=नावलोकिता किम्?

पुकारना। मैं इस चित्र को वहाँ ऐसी जगह छिपाऊँगा, जहाँ कबूतरों के सिवाय और कोई देख नहीं सकता। **(ऐसा कहकर तेजी से प्रस्थान)**

मिश्रकेशी—आश्चर्य की बात है। यद्यपि इनका हृदय अन्य नायिका में अनुरक्त है, फिर भी ये अपने प्रथम प्रणय की रक्षा कर रहे हैं। अतः इनका प्रेम स्थायी है।

प्रतीहारी—**(हाथ में पत्र लिये प्रवेश कर)** महाराज की जय हो, जय हो।

राजा—वेत्रवती! तुमने मार्ग में महारानी को तो नहीं देखा था।

प्रतीहारी—देव! देखा था। मेरे हाथ में यह पत्र देखकर वे लौट गईं।

---

praticchana palace. I shall hide this picture there at such a place, where except peason no one can be able to see it. *(Exit with hasty steps)*

Miśrakeśī—This person (the king) whose affection has now become less ardent, shows regard to his first love, though his heart is transferred to another.

Door-keeper—*(Entering with letter in hand)* May your majesty be victorious, be victorious.

The king—Vetravatī! did you really not seen the queen on your way?

राजा—कार्यज्ञा देवी, कार्योपरोधं मे परिहरति।

प्रतिहारी—देव! अमच्चो विण्णवेदि अज्ज रज्जकज्जस्स बहुलदाए एक्कं ज्जेव मए पोरकज्जं पच्चवेक्खिदं, तं देवो पत्तारोविदं पच्चक्खीकरेदुत्ति। [**देव! अमात्यो विज्ञापयति अद्य रांज्यकार्यस्य बहुलतया एकमेव मया पौरकार्यं प्रत्यवेक्षितम्, तत् देवः पत्रारोपितं प्रत्यक्षीकरोतु इति।**]

राजा—इतः पत्रं दर्शय।

(प्रतिहार्युपनयति)

प्रतीहारी—देव! दृष्टा=पथिमध्ये देवी वसुमती अवलोकिता मया, (किन्तु) पत्रहस्तां=पत्रधारिणीम्, मां, प्रेक्ष्य=अवलोक्य, प्रतिनिवृत्ता=ततः प्रत्यावृत्य गता।

राजा—कार्यं=करणीयम्, जानाति या सा कार्यज्ञा=कार्याकार्यविवेकवती, देवी=वसुमती, अत एव, मे=मम, कार्योपरोधम्=कार्यविरोधम्, परिहरति=परित्यजति (राजकार्यविघ्नजननमकार्यमिति मत्वा निवर्तिता इत्यर्थः)।

प्रतीहारी—देव! अमात्यः=सचिवः, विज्ञापयति=निवेदयति (सूचयति), अद्य=भवदनुपस्थितिदिवसे, राजकार्यस्य=राज्यरक्षणहेतुभूतकार्यस्य, बहुलतया=अधिकतया, एकमेव=एकमात्रम्, मया=अमात्येन, पौरकार्यम्=भवत्प्रत्यवेक्षणीयं पुरवासिनां कार्यम्, प्रत्यवेक्षितम्=दृष्टम्, तत्=तत्कार्यम्, पत्रारोपितं=पत्रे लिखितम्, प्रत्यक्षीकरोतु=विलोकयतु भवानिति शेषः।

राजा—इतः=ममान्तिके, पत्रं दर्शय।

(प्रतीहारी=द्वारपालः, उपनयति=राज्ञो हस्ते पत्रमर्पयति।)

राजा—महारानी राजकार्य की महत्ता को समझती हैं, इसीलिए मेरे कार्य में बाधा डालने से दूर रहती हैं।

प्रतीहारी—देव! सचिव महोदय कहते हैं—आज राजकार्य की अधिकता के कारण मैं एक ही जनकार्य देख सका हूँ, वह इस पत्र में लिखकर भेज रहा हूँ, आप उसे देख लें।

राजा—इधर पत्र दिखाओ।

(प्रतीहारी पत्र पास लाती है)

Door-keeper—Yes, seeing me with a letter in hand, she returned.

The king—Conscious of the importance of my duty, she avoids, causing interruption to my work.

Door-keeper—You majesty! the minister thus reports. By reason of the load of work only one case of the citizens has been investigated (thoroughly checked) by me. May your majesty see it as put on paper.

The king—Show the letter here.

(Door-keeper brings it near)

राजा—(वाचयति) विदितमस्तु देवपादानाम्, धनवृद्धिर्नाम वणिक् वारिपथोपजीवी नौव्यसनेन विपन्नः, स चानपत्यः, तस्य चानेककोटिसंख्यं वसु, तदिदानीं राजस्वतामापद्यते इति श्रुत्वा देवः प्रमाणम् इति। (सविषादम्) कष्टं खल्वनपत्यता। वेत्रवति! महाधनतया बहुपत्नीकेनानेन भवितव्यम्, तदन्विष्यतां यदि काचिदापन्नसत्त्वास्य भार्या स्यात्।

प्रतीहारी—दाणिं ज्जेव साकेदउरस्स सेट्ठिणो दुहिदा णिव्वुत्तपुंसवणा तस्सा जाआ सुणीअदि। **[इदानीमेव साकेतपुरस्य श्रेष्ठिनो दुहिता निर्वृत्तपुंसवना तस्य जाया श्रूयते।]**

राजा—(वाचयति=पठति) देवपादानाम्=नरपतिचरणानाम्, विदितमस्तु=ज्ञातमस्तु, वारिणः पन्थाः इति वारिपथः, तेन उपजीवतीति वारिपथोपजीवी=समुद्रादिजलपथे वाणिज्यार्थं नौकापरिचालनेन जीविकानिर्वाही, धनवृद्धिर्नाम=एतन्नामकः, वणिक्=पण्याजीवः, नावः= नौकायाः, व्यसनं=विपत् (जलमज्जनम्), तेन=नौव्यसनेन, विपन्नः=मृतः, सः=वणिक् च, अनपत्यः=(न पतति वंशो येन जातेन तदपत्यं तस्मात्) निःसन्तानः, तस्य=वणिजस्य, अनेककोटिसंख्यम्-अनेकाः=बहवः, कोटयः=सङ्ख्याः, यस्य तत्, वसुधनम्, अस्तीति शेषः, तत्=वसु, इदानीम्=धनवृद्धेर्देहान्तात् परम्, राजस्वताम्=राजस्वामिकताम्, आपद्यते=प्राप्नोति, इति श्रुत्वा=श्रवणविषयीकृत्य, देवः=भवान् (राजा), प्रमाणम्=कर्तव्यतानिश्चयकृत्। (सविषादम्= सखेदम्) कष्टम्=दुःखम्, खल्विति निश्चयेन, अनपत्यता=निःसन्तानता। वेत्रवति! (प्रतीहार्य्याः सम्बोधनम्) महाधनतया=बहुधनतया (कोटीश्वरत्वेन), अनेन=धनवृद्धिना, बह्व्यः=अनेकाः, पत्न्यः=भार्याः, यस्य तेन बहुपत्नीकेन, भवितव्यम्। तत्=तस्मात्, अन्विष्यताम्=अनुसन्धीयताम्, यदि, अस्य=वणिजस्य, काचित् भार्या=पत्नी, आपन्नं=गर्भे प्राप्तं, सत्त्वं=जन्तुः, यया सा आपन्न-सत्त्वा=गर्भिणी, स्यात्।

राजा—**(पढ़ता है)** महाराज को ज्ञात हो कि जलमार्ग से जीविका कमाने वाला कोई धनवृद्धि नाम का वैश्य नौका डूबने से मर गया है। उसे कोई सन्तान नहीं है और उसके पास करोड़ों का धन है। वह धन अब राज्य की सम्पत्ति माना जा रहा है, यह सुनकर आप कर्त्तव्य का निश्चय करें। **(खेदपूर्वक)** निःसन्तान होना भी कष्टकर बात है। वेत्रवति! वह बहुत धनाढ्य था, इस कारण उसकी अनेक पत्नियाँ होंगी, अतः पता लगाओ कि उनमें से शायद कोई गर्भवती हो।

The king—*(Reads)* A leading merchant, named Dhanmitra, carrying on business by sea, died . a ship-wreck. He is childless though owner of crors of rupees. ..is store of wealth now being considered as the property of state-treasury. Hearing this your majesty should decide for its lordship. *(Sorrowfully)* Childlessness is misery indeed. Vetravatī! on account of his being possessed of vast wealth the merchant must have had many wives. Let it be enquired if some one among his wieves quick with child or pragnent?

राजा—स खलु गर्भः पित्र्यमृक्थमर्हति। गत्वैवममात्यं ब्रूहि।

प्रतीहारी—जं देवो आणवेदि। **[यत् देव आज्ञापयति।]** (इति प्रस्थिता)

राजा—एहि तावत्।

प्रतीहारी—(प्रतिनिवृत्य) एसाम्हि। **[एषास्मि।]**

राजा—किमनेन सन्ततिरस्ति नास्तीति।

येन येन वियुज्यन्ते प्रजाः स्निग्धेन बन्धुना।
स स पापादृते तासां दुष्यन्त इति घुष्यताम्॥ २५॥

प्रतीहारी—साकेतपुरस्य=अयोध्यायाः, श्रेष्ठिनः=वणिजः, दुहिता=तनया, निर्वृत्तं=निष्पन्नं, पुंसवनं=पुंसन्तानसम्पादकसंस्कारविशेषः, यस्याः सा निर्वृत्तपुंसवना, तस्य=धनवृद्धेः, जाया=पत्नी, इदानीमेव=सम्प्रत्येव (निर्वृत्तपुंसवना जाता इति), श्रूयते=लोकपरम्परया आकर्ण्यते।

राजा—स खलु= स एव, गर्भः=उदरस्थः बालः, पित्र्यम्=पैतृकम्, ऋक्थम्=धनम्, अर्हति=प्राप्तुं योग्यो भवति। गत्वा=अमात्यअन्तिकं प्राप्य, एवं=मदीयोक्तं, ब्रूहि=कथय।

प्रतीहारी—यद्देव आज्ञापयति=यद् भवान् निर्दिशति, तदेव गत्वा निवेदयामि। (इति= इत्युक्त्वा, प्रस्थिता=निर्गता)

राजा—एहि=प्रतिनिवर्तस्व तावत्।

प्रतीहारी—(प्रतिनिवृत्त्य=पुनरेत्य) एषास्मि प्रतिनिवृत्ता।

राजा—सन्ततिः=धनवृद्धेः सन्तानः, अस्ति वा नास्ति वा अनेन विचारेण किं प्रयोजनम्। (सन्ततिरस्तु वा मास्तु वा तद्विचारो मास्तु।)

प्रतीहारी—अभी-अभी सुना जा रहा है कि साकेत-निवासी किसी सेठ की पुत्री जो धर्मवृद्ध की पत्नी है, उसका पुंसवन संस्कार हो चुका है।

राजा—वही गर्भस्थ बालक अपने पिता के धन का अधिकारी है, यह बात जाकर अमात्य को बता दो।

प्रतीहारी—महाराज की जो आज्ञा **(जाने के लिए तैयारी)**।

राजा—यहाँ आओ।

प्रतीहारी—**(पास आकर)** यह मैं उपस्थित हूँ।

राजा—उसकी कोई सन्तान है या नहीं—इसका पता लगाने की क्या आवश्यकता?

Door-keeper—(Sir) It is reported that his wife, the daughter of a merchant of Sāketa, has had her Puṁsavana ceremony performed only recently.

The king—Surely the babay under embroy deserves paternal property. Go, say so to the minister.

Door-keeper—As your majesty commands. *(Started)*

The king—Just come.

Door-keeper—Here I am.

The king—What matters it if one has or has not progency?

प्रतीहारी—एदं णाम घोषइदव्वं। देव! (इति निष्क्रम्य पुनः प्रविश्य) काले पविट्ठं विअ अहिणंदिदं देवस्स सासणं महाजणेण। [**एतत् नाम घोषयितव्यम्। देव! काले प्रवृष्टमिव अभिनन्दितं देवस्य शासनं महाजनेन।**]

राजा—(दीर्घमुष्णञ्च निःश्वस्य) एवं भोः! सन्ततिविच्छेदनिरवलम्बना मूलपुरुषावसाने सम्पदः परमुपतिष्ठन्ते; ममाप्यन्ते पुरुवंशश्रिय एष वृत्तान्तः।

अन्वयः—प्रजाः येन येन स्निग्धेन बन्धुना वियुज्यन्ते पापादृते तासां स सः दुष्यन्तः इति घुष्यताम्॥ २५॥

येनेति। प्रजाः=राज्यस्था जनाः, येन येन स्निग्धेन=स्नेहवता, बन्धुना=पुत्रादिबान्धवजनेन, वियुज्यन्ते=नियतिवशाद् वियुक्ता भवन्ति, पापादृते=पापं विना अथवा पापिनं विना, तासां=प्रजानाम्, स सः=बन्धुः, दुष्यन्तः=राजा दुष्यन्तः, इति घुष्यताम्=तारस्वरेण सूच्यताम्। अत्र रूपकालङ्कारः, पथ्यावक्त्रं वृत्तम्॥ २५॥

भावार्थः—धनवृद्धेः स्थितायामपि सन्ततौ सम्प्रति तदर्थजातं मदधीनमेव तिष्ठतु यथान्यः कोऽपि तत्रापहर्तुं शक्नुयात्, परिशेषे तु तदपत्यमेव प्राप्स्यतीति भावः। अहमेव नियतिवशाद् बन्धुवियुक्तानां बन्धुः संरक्षकश्च इति सर्वत्र राज्ये भेरीनादपूर्वकम् आवेद्यतामिति च भावः॥ २५॥

प्रतीहारी—एतत्=भवदुक्तप्रकारेण, घोषयितव्यम्=भेरीनिनादपूर्वकमावेदयितव्यम्, नामेत्युपगमे। (इति=इत्युक्त्वा, निष्क्रम्य=निर्गत्य, पुनः=भूयः, प्रविश्य=प्रवेशं विधाय) देव!=स्वामिन्! देवस्य=भवतः, शासनम्=निदेशम्, काले=अपेक्षितसमये, प्रवृष्टं=प्रकृष्टवर्षणमिव, महाजनेन=श्रेष्ठप्रजाजनेन, अभिनन्दितम्=प्रशंस्य स्वीकृतम्।

राजा—(दीर्घमुष्णञ्च निःश्वस्य भोः! भो इति विषादसूचकमव्ययम्। अथवा प्रतीहारी-

---

हमारी प्रजा में घोषणा करा दो कि जो लोग अपने किसी भी बन्धु से रहित हों, पापियों के अतिरिक्त अन्य सबका बन्धु दुष्यन्त है॥ २५॥

प्रतीहारी—यही घोषित करना चाहिए। **(यह कहकर प्रस्थान तथा पुनः प्रवेश)** समय पर होने वाली वृष्टि की भाँति समस्त महाजनों ने आपकी घोषणा का अभिनन्दन किया है।

राजा—(गर्म और लम्बी साँस लेकर) हाय! सन्तान के अभाव में कमाने वाले व्यक्ति के मर जाने पर सम्पत्ति पराये हाथ में चली जाती है। मेरे पश्चात् पुरुवंश की सम्पत्ति की भी यही दशा होने वाली है।

From whatever loving kinsman the subjects are separeted, Duśyanta will be (in the place of) that (kinsman) to them, except sinners, let this be proclaimed. (25)

Door-keeper—Thus surely should be proclaimed. *(Going out and entering again)* your majesty's proclamation (command) had been greeted by the people like a timely shower.

The king—*(Heaving a deep and hot sight)* Thus, O! the riches of families, that have become supportless owing to the

प्रतीहारी—पडिहदं अमंगलं। **[प्रतिहतममङ्गलम्।]**

राजा—धिङ्मामुपनतश्रेयोऽवमानिनम्।

मिश्रकेशी—असंसअं पिअसहीं ज्जेव हिअए कदुअ णिंदिदो अणेण अप्पा। **[असंशयं प्रियसखीमेष हृदये कृत्वा निन्दितः अनेनात्मा।]**

राजा—

संरोपितेऽप्यात्मनि धर्मपत्नी त्यक्ता मया नाम कुलप्रतिष्ठा।
कल्पिष्यमाणा महते फलाय वसुन्धरा काल इवोप्तबीजा॥ २६॥

सम्बोधनम् इति केचित्। सम्पदः=विभवाः, मूलपुरुषस्य=अर्जयितुर्वंशधरस्य, अवसाने=नाशे (अन्ते), मूलपुरुषावज्ञाने, सन्ततेः=अपत्यस्य, विच्छेदेन=विलोपेन, निरवलम्बनाः=निराश्रयाः, एवम्=इत्थम् (धनवृद्धिसम्पद् इव), परं=तदितरं जनम्, उपतिष्ठन्ते=उपगच्छन्ति। तथाहि, ममापि= अनपत्यस्य दुष्यन्तस्यापि, अन्ते=अवसाने, पुरुवंशश्रियः=पौरवलक्ष्म्याः, एष वृत्तान्तः= ईदृगेव प्रकारः स्यादिति।

प्रतीहारी—अमङ्गलं=भवदाशङ्कितं निजावसानरूपं, सन्ततिविच्छेदरूपं पौरवश्रियः पराश्रयणं चेति सर्वमशुभम्, प्रतिहतम्=देवताप्रसादात् निराकृतं भवतु।

राजा—उपनतं=स्वयमेवोपस्थितम्, श्रेयः=ससत्त्वशकुन्तलारूपं कल्याणं, अवमन्यते= प्रत्याख्यानादिना तिरस्करोतीति तम् उपनतश्रेयोऽवमानिनम्, माम्=दुष्यन्तम्, धिक्=निन्दामीत्यर्थः।

मिश्रकेशी—असंशयं=सुनिश्चितमेव, अनेन=राजा दुष्यन्तेन, प्रियसखीम्=शंकुन्तलामेव, हृदये=स्वमनसि कृत्वा, आत्मा, निन्दितः=तिरस्कृतः भर्त्सितः।

अन्वयः—काले उप्तबीजा (अत एव) महते फलाय कल्पिष्यमाणा वसुन्धरा इव मया कुलप्रतिष्ठा (हेतुभूता) धर्मपत्नी आत्मनि संरोपिते अपि त्यक्ता नाम॥ २६॥

प्रतीहारी—ईश्वर इस अमंगल को दूर करें।

राजा—स्वयमागत मंगल का अपमान करने वाले मुझ दुष्यन्त को धिक्कार है।

मिश्रकेशी—निःसन्देह प्रिय सखी शकुन्तला का विचार कर ही इन्होंने स्वयं की निन्दा की है।

राजा—उचित समय पर कोई इसलिए बीज बोए कि भविष्य में विशेष फल मिलेगा औरं यह कार्य कर वह व्यक्ति आशान्विता वसुधा को त्याग दे, ठीक उसी प्रकार मैंने उसमें

---

failure of progeny, wait upon another on the death of the original representative. At my demise too such is the fate of the riches of Purū's line.

Door-keeper—Let evil be averted.

The king—Fie (disgust) on me that disregarded the good (attractive) that had arrived itself.

Miśrakeśī—Certainly, having none but my dear friend in mind, he censured himself.

The king—Although myself was implanted (in her), I cast off my lawful wife the support of my family, who like the earth

मिश्रकेशी—अपरिच्चत्ता दाणिं दे भविस्सदि। [**अपरित्यक्ता इदानीं ते भविष्यति।**]

चेटी—(जनान्तिकम्) अज्जे! इदं पत्तं पेसअंतेण किं विआरिदं अमच्चेण। पेक्ख दाव भट्टिणो वाहजलप्पवाहो संवुत्तो। अधवा ण एसो सोअं बुद्धिपुव्वअं पडिवज्जिस्सदि ता मेहच्छण्णागारट्ठिदं णिव्वाणसमत्थं अज्जमाहव्वं गेण्हिअ आअच्छ। [**आर्ये! एतत् पत्रं प्रेषयता किं विचारितममात्येन। प्रेक्षस्व तावत् भर्तुर्बाष्पजलप्रवाहः संवृत्तः। अथवा नैष शोकं बुद्धिपूर्वकं परिवर्जयिष्यति, तन्मेघाच्छन्नागारस्थितं निर्वाणसमर्थम् आर्यमाधव्यं गृहीत्वा आगच्छ।**]

संरोपित इति। काले=उचितसमये, उप्तं=रोपितं, बीजं यस्याः सा उप्तबीजा=कृतबीजावपना, अत एव, महते=प्रभूताय (विपुलाय), फलाय=शस्याय, कल्पिष्यमाणा=प्रभविष्यन्ती, प्रभूतं शस्यं जनयितुं शक्ष्यन्ति, वसुन्धरा=भूमिरिव, मया=दुष्यन्तेन, कुलस्य=स्ववंशस्य, प्रतिष्ठा= स्थितिहेतुभूता (तद्रक्षसन्तानधारणादाश्रयस्वरूपा), धर्मपत्नी=धर्मानुसारेण परिगृहीता स्त्री शकुन्तला, आत्मनि=स्वस्मिन्, संरोपिते='आत्मा वै जायते पुत्रः' 'आत्मा प्रविश्य जायायां पुत्ररूपेण जायते' इत्यादि श्रुतिस्मृतिभ्यां गर्भरूपेण तदुदरे आहितेऽपि, बीजे निषिक्तेऽपि, त्यक्ता=अवधीरिता, नाम इति कुत्सायाम्। अत्र हेतुहेतुमद्भावात् पदार्थहेतुकं काव्यलिङ्गम्, समुदाये तु श्रौतोपमालङ्कारः। उपजातिर्वृत्तम्॥ २६॥

भावार्थः—यथा वसुन्धरा काले उपबीजत्वेनैव महते फलाय कल्पिष्यमाणा भवति तथैव पत्नीरपि, परन्तु तस्याः परित्यागेन सन्ततिविच्छेदस्याप्यहमेव हेतुरित्याशयः।

मिश्रकेशी—इदानीम्=सम्प्रति (प्रत्यक्षेण मया तवेदृश्या दशाया दर्शनादेतदव्यवहितकाले एवेत्यर्थः), अपरित्यक्ता=पुनर्लब्धा शकुन्तला, ते=त्वत्कृते, भविष्यति। (मत्सकाशात्ते गाढानुरागमाकर्ण्य शकुन्तला पुनरवश्यं त्वत्समीपमागमिष्यत्येव।)

चेटी—(जनान्तिकम्=सख्याः कर्णे) आर्ये=इति प्रतीहार्य्याः सम्बोधनम्, एतत्=तवानीतम्, पत्रं=धनवृद्धिवृत्तान्तोल्लिखितं पत्रम्, प्रेषयता=राज्ञोऽन्तिकं प्रेरयता, अमात्येन=मन्त्रिणा

पुत्र रूपी बीज तो बो दिया था परन्तु अपने वंश की स्थिति की हेतुभूता उस पत्नी को त्याग दिया है (अतः निश्चय ही मैं सर्वथा गर्हित हूँ)॥ २६॥

मिश्रकेशी—अब वह तुम्हारे लिए परित्यक्ता नहीं रहेगी।

चेटी—(**प्रतीहारी के कान में**) आर्ये! इस पत्र को भेजकर अमात्य ने (देखो) क्या कर डाला? देखो, स्वामी के आँसू बहने लगे। अथवा—ये महाराज तो बुद्धिपूर्वक विचार कर निज शोक को त्यागेंगे नहीं, अतः मेघाच्छन्न प्रासाद में विराजमान शोक दूर करने में समर्थ आर्य माधव्य को लेकर यहाँ आ जाओ।

---

with the seed sown at the proper time, was to conduce to a mighty fruit. (26)

Miśrakeśī—Now, she will not be a discarded one for you.

Maid—*(To door-keeper)* Madam! see, what that minister has done, by sending this letter? See, the flow of tears had started from the eyes of his majesty. Or this will not be able to remove his grief through wisdom. So, in order to console him fetch the

प्रतीहारी—सुट्ठु दे भणिदं। [**सुष्ठु त्वया भणितम्।**] (इति निष्क्रान्ता)

राजा—अहो! दुष्यन्तस्य संशयमारूढाः पिण्डभाजः। कुतः—

अस्मात् परं बत यथाश्रुति सम्भृतानि
को नः कुले निवपनानि करिष्यतीति।
नूनं प्रसूतविकलेन मया प्रसिक्तं
धौताश्रुसेकमुदकं पितरः पिबन्ति॥ २७॥

पिशुनेन, किं विचारितम्=किं विवेचनं कृतम्। प्रेक्षस्व=पश्य, तावत्, भर्तुः=स्वामिनो राज्ञः दुष्यन्तस्य, बाष्पजलप्रवाहः=नयनजलस्रोतः, प्रवृत्तः=आरब्धः। अथवा, एषः=राजा दुष्यन्तः, बुद्धिपूर्वकम्=प्रज्ञापूर्वकम् (विचारपूर्वकम्), शोकं=शकुन्तलावियोगजं दुःखम्, न=नैव, परिवर्जयिष्यति=न परित्यक्ष्यति। तत्=तस्मात्, मेघाच्छन्नागारस्थितम्=मेघाच्छन्नागारनामकप्रासादगतम्, निर्वाणसमर्थम्=शोकापनोददक्षमम्, आर्य्यमाधव्यम्=विदूषकं, गृहीत्वा, आगच्छत=सहैवात्रानय।

प्रतीहारी—सुष्ठु त्वया भणितम्=साधु त्वयोक्तम्। (इति=इत्युक्त्वा, निष्क्रान्ता=माधव्यान्तिकं प्रस्थिता।)

राजा—अहो इति शोके, दुष्यन्तस्य=मम, पिण्डं=श्राद्धान्ननिर्मितं पिण्डं, भजन्ते=अर्हन्तीति पिण्डभाजः=पितरः, संशयमारूढाः=अग्रे पिण्डदानाभावात् पिण्डं लप्स्यन्ते न वेतीति सन्देहापन्नाः।

अन्वयः—अस्मात् परं नः कुले कः यथाश्रुति सम्भृतानि निवपनानि (करिष्यति) इति पितरः प्रसूतिविकलेन मया प्रसिक्तम् उदकं धौताश्रुसेकं नूनं पिबन्ति बत॥ २७॥

अस्मादिति। अस्मात्=दुष्यन्तात्, परम्=अनन्तरम्, नः=अस्माकं, कुले=वंशे, कः=जनः, श्रुतिं=वेदम्, अनतिक्रम्येति यथाश्रुति=वेदोक्तविधानेन, सम्भृतानि=सम्यगायोजितानि, निवपनानि=

प्रतीहारी—तुमने ठीक कहा। **(प्रस्थान)**

राजा—हा! दुष्यन्त के पिण्डभागी पितर अब सन्देह में पड़ गये। क्योंकि—

मेरे बाद मेरे वंश में कौन व्यक्ति ऐसा होगा, जो शास्त्रानुसार आयोजित श्राद्ध, पिण्डदान और तर्पण करेगा। इसी बात को सोचकर हमारे पितर मुझ सन्तानहीन व्यक्ति द्वारा प्रदत्त तर्पणजल को पीयेंगे तो सही परन्तु उस तर्पणजल में आँसू भी (जो उनके मुख का धोवन होगा) मिलाकर पीयेंगे॥ २७॥

---

venerable Mādhavya from the Meghācchanna palace and come back.

Door-keeper— You say well. *(Exit)*

The king—Oh! the ancestors of Duśyanta have mounted upon a doubt. Why?

Who after this (Duśyanta) in our family, alas! will offer (us) the libations prepared according to scriptural preceept? Thus thinking, surely my forefathers drink what remains of the water after washing their tears (the water) which is poured out (to them) by me, who am destitute of (devoid of) progeny.

मिश्रकेशी—हद्दी ! हद्दी ! सहि क्खु दीवे ववधाणदोसेण अंधआरं अणुहोदि राएसी। **[हा धिक्! हा धिक्! सति खलु दीपे व्यवधानदोषेण अन्धकारमनुभवति राजर्षिः ।]**

चेटी—भट्टा ! अलं संदाबिदेन, वअत्थो ज्जेव पहू अबरासु देवीसु अणुरूवपुत्त-जम्मेण पुव्वपुरुसाणं अणिणो भविस्सदि। (आत्मगतम्) ण मे वअणं पडिच्छदि। अणुरूवं वि ओसधं आदंकं णिअत्तेदि। **[भर्त्तः! अलं सन्तापितेन, वयस्थ एव प्रभुः अपरासु देवीषु अनरूपपुत्रजन्मना पूर्वपुरुषाणामनृणो भविष्यति। न मे वचनं प्रतीच्छति। अनुरूपमपि औषधम् आतङ्कं निवर्त्तयति।]**

श्राद्धीयपिण्डतर्पणादीनि (करिष्यति), इति=एवं चिन्तयित्वा, पितरः=मम पूर्वपुरुषाः, प्रसूत्या=सन्तत्या, विकलेन=रहितेन (पुत्रहीनेन), मया=दुष्यन्तेन, प्रसिक्तम्=तेभ्यो दत्तम्, उदकं=तर्पणजलम्, धौतः=क्षालितः, अश्रुसेकः=बाष्पबिन्दूः, येन तत् यथा स्यात्तथा धौताश्रुसेकम्, नूनम्=निश्चितमेव, पिबन्ति। बत इति खेदे। अत्र क्रियोत्प्रेक्षालङ्कारः, वाक्यार्थहेतुकं काव्यलिङ्गमपि। वसन्ततिलकावृत्तम्॥ २७॥

भावार्थः—मदीयः पितरः मत्परं पिण्ड-तर्पणजलाभावमुत्प्रेक्ष्य शोकजनितबाष्पप्रवाहेण गण्डं तदनु अधरमपि प्लावयिष्यन्ति, मदर्पितं तर्पणजलमासाद्य चामेध्यं तमश्रुप्रवाहं प्रक्षाल्यावशिष्टं पास्यन्तीत्यहो कष्टम्॥ २७॥

मिश्रकेशी—हा धिक्! हा धिक्! इति खेदे, खलु इति निश्चयेन, दीपे सत्यपि, व्यवधानं=दूरता, एव दोषः, तेन व्यवधानदोषेण, अन्धकारमनुभवति, राजर्षिर्दुष्यन्तः। (यथा दीपस्य विद्यमानतायामपि दूरत्वादिदोषजुष्टत्वाल्लोकोऽन्धकारमनुभवति तथाऽयं राजर्षिः शकुन्तलागर्भस्थस्य पुत्रस्य सद्भावेऽपि अन्तर्द्धि आदि दोषजुष्टतयाऽनपत्यतादुःखमनुभवति।)

चेटी—सन्तापितेन=शोकेन, अलम्=पर्याप्तम्, भर्तः स्वामी ! प्रभुः=भवान् (राजा), वयसि यौवने तिष्ठतीति यः सः वयस्थः=तरुण एव, अपरासु=शकुन्तलेतरासु, देवीषु=कृताभिषेकमहिषीषु, अनुरूपपुत्रजन्मना=आत्मसदृशपुत्रोत्पत्त्या, पूर्वपुरुषाणाम्=पितॄणाम्, अनृणः=ऋणविमुक्तः,

---

मिश्रकेशी—हाय ! हाय ! दीपक के रहते हुए भी मध्य में व्यवधान (रुकावट) के कारण ये राजर्षि इस समय अन्धकार का अनुभव कर रहे हैं।

चेटी—स्वामी ! अधिक सन्ताप न कीजिए। अभी आप तरुण हैं, अन्य रानियों के गर्भ से अपने अनुरूप पुत्र उत्पन्न कर पितृऋण से मुक्त हो सकेंगे। **(मन में)** ये मेरी बात तो सुनते ही नहीं। वस्तुतः उपयुक्त औषधि ही रोग के आतंक को नष्ट करने में समर्थ होती है।

***Miśrakeśī*—**Oh alas! oh alas! Though the lamp is really there, he is experiencing the evil of darkness owing to the fault of the screen.

***Maid*—**My lord! do not be so gloomy. Still you are quite young, by producing progeny from your other queens, you can clear your ancestorial debt. *(To herself)* His is not hearing me. Actually a suitable medicine only can succeed to remove (uproot) a desease.

राजा—(शोकनाटितकेन)

आमूलशुद्धसन्तति कुलमेतत् पौरवं प्रजावन्ध्ये।
मय्यस्तमितमनार्य्ये देश इव सरस्वतीस्रोतः ॥ २८ ॥

(इति मोहमुपागतः)

भविष्यति। (आत्मगतम्=स्वगतम्) मे=मह्यं, वचनं=वाक्यं (कथनं), प्रतीच्छति=गृह्णाति (मद्वचनेन राजा नैवाश्वासनयुक्तो भवति), अनुरूपम्=उपयुक्तम् अपि, औषधम्, आतङ्कं=भयजनकं रोगम्, विवर्त्तयति=विनाशयति। (अनुरूपं भेषजं यथा रोगं नाशयति तथा माधव्यकर्तृकानुरूपोपदेश एवास्य सन्तापं नाशयिष्यति न पुनर्हीनाया मम वचनेनेत्याशयः)।

राजा—(नाटितमेव नाटितकम्, शोकस्य नाटितकम्=नाटनम्, इति शोकनाटितकम्, तेन शोकनाटितकेन=शोकाभिनयेन)

अन्वयः—आमूलशुद्धसन्ततिः पौरवम् एतत् कुलं प्रजावन्ध्ये अनार्ये मयि सरस्वतीस्रोतः इव अस्तम् ॥ २८ ॥

आमूलेति। आमूलात्=आदितः (एकत्रादिपुरुषाच्चन्द्रमसः), सरस्वतीपक्षे—प्रथमोत्पत्ति-देशात्, आरभ्य, शुद्धा=अकलङ्किता, पक्षे-पवित्रा, सन्ततिः=पुत्रपौत्रादिपरम्परा, पक्षे—धारा, आमूलशुद्धसन्ततिः, पौरवम्=पुरुसम्बन्धि, पक्षे—भूयिष्ठम्, एतत् कुलम्=अयं वंशः, प्रजावन्ध्ये=निःसन्ताने, पक्षे—जनशून्ये अरण्यादिक्षेत्रे, अनार्ये=अप्रशस्ते, पक्षे-अनार्यम्लेच्छादि अध्युषिते, मयि=दुष्यन्ते, पक्षे—तथाविधे देशे, तथाभूतं सरस्वतीस्रोत इव—सरस्वत्याः=तदाख्यायाः नद्याः, स्रोतः=प्रवाहः, तदिव, अस्तम्=अदर्शनम्, इतं=गतम् (विलुप्तम्), पक्षे शोषं गतम्। अत्र श्रौती-पूर्णोपमालङ्कारः। आर्य्या जातिः ॥ २८ ॥

भावार्थः—यथा अनार्यम्लेच्छादि अध्युषिते निर्जनप्रदेशे सरस्वत्याः प्रवाहः विलुप्तं भवति तथैव आमूलशुद्धसन्ततिः पुरुसम्बन्धी एतत् कुलं प्रजावन्ध्ये अस्तं गमिष्यति, इदमतीव दुःखकरमिति भावः ॥ २८ ॥

(इति मोहम्=मूर्च्छाम्, उपागतः=प्राप्तः)

राजा—(शोक का अभिनय करके)

अनार्यों से आक्रान्त देश में सरस्वती के निर्मल स्रोत की भाँति, आरम्भ से ही शुद्ध सन्ततिवाला पुरुवंश मुझ निःसन्तान अनार्य के कारण नष्ट हो रहा है ॥ २८ ॥

(यह कहकर मूर्च्छित हो जाता है।)

The king—*(Acting as if full of sorrow)*

As the current of holy river Sarswatī disappears in such a certain place, wherever resinding Anāryās, accordingly. The race of Purū which is from the very begining well known for its pure progeny, is going to disappear due to me, who is childless and Anārya. (28)

(Becomes senseless)

चेटी—(ससम्भ्रमम्) समस्ससदु समस्ससदु भट्टा। [**समाश्वसितु समाश्वसितु भर्ता।**]

मिश्रकेशी—किं दाणिं ज्जेव णिव्वुदं करेमि। अथवा सुदं मए सउंतलं समस्संतीए देवजणणीए मुहादो जणभाअसमुस्सुआओ देवाओ ज्जेव तह अणुचिट्ठिस्संति, जह सो भट्टा अइरेण धम्मपदिणीं तुमं अहिणंदिस्सदित्ति। ता ण जुत्तं मे एत्थ विलंबिदुं, जाव इमिणा वुत्तंतेण पिअसहीं सउंतलं समस्सासेमि। [**किमिदानीमेव निर्वृत्तं करोमि, अथवा श्रुतं मया शकुन्तलां समाश्वासयन्त्या देवजनन्या मुखात् यज्ञभागसमुत्सुका देवा एव तथा अनुष्ठास्यन्ति; यथा स भर्ता अचिरेण धर्मपत्नीं त्वामभिनन्दिष्यतीति तन्न युक्तं मे अत्र विलम्बितुम्, यावदेतेन वृत्तान्तेन प्रियसखीं शकुन्तलां समाश्वासयामि।**] (इत्युद्भ्रान्तकेन निष्क्रान्ता)

चेटी—(ससम्भ्रमम्=व्यस्ततासहितं सत्वरं वा) समाश्वसितु समाश्वसितु=धैर्यम् आश्रयतु, भर्त्ता=प्रभुः।

मिश्रकेशी—किमिति प्रश्ने, इदानीमेव=सम्प्रत्येव, निर्वृत्तं=शकुन्तलावृत्तान्तनिवेदनेन सुखितम्, करोमि। अथवा, शकुन्तलाम्=पतिविरहदुःखिताम्, समाश्वासयन्त्या=सम्यग्रूपेण आश्वासयन्त्या, देवजनन्याः=अदितेः, मुखात्=आननात्, श्रुतम्=आकर्णितम्, मया, (यत्) यज्ञभागाय=यज्ञभागग्रहणाय, समुत्सुकाः=उत्कण्ठिताः, देवाः=अमराः, तथा एव=तेनैव रूपेण, अनुष्ठास्यन्ति=विधास्यन्ति, यथा=येन रूपेण, स भर्त्ता=स्वामी राजा दुष्यन्तः, अचिरेण=शीघ्रमेव, धर्मपत्नीं=सहधर्मिणीं, त्वाम्=शकुन्तलाम्, अभिनन्दिष्यति=सादरं ग्रहीष्यति (इति मया श्रुतम्)। तत्=तस्मात्, मे=मम, अत्र=अस्मिन् प्रदेशे, विलम्बितुम्=चिरायितुम्, न युक्तम्=नैवोचितम्। यावत्=यावत्कालपर्यन्तम्, एतेन=पूर्वनिर्दिष्टेन, वृत्तान्तेन=समाचारेण, प्रियसखीम्=शकुन्तलाम्, समाश्वासयामि। (सम्प्रति शकुन्तलार्थमेव पर्य्याकुलतया राज्ञो यज्ञानुष्ठानासम्भवात् भविष्यत्यपि दुष्यन्तात् परमस्मिन् भूमण्डले सत्यराजके स्वभोग्ययज्ञभागलोपाच्च स्वार्थसम्पादनार्थमेव देवा आग्रहीष्यन्तीति भावः।) इत्युद्भ्रान्तकेन=गतिविशेषेण, निष्क्रान्ता=प्रस्थिता)

चेटी—(**घबराहट के साथ**) महाराज! धैर्य धरिये, धैर्य धरिये।

मिश्रकेशी—क्या अभी इन्हें शकुन्तला के सम्बन्ध में समाचार सुनाकर प्रसन्न कर दूँ। अथवा शकुन्तला को आश्वासन देते समय मैंने देवमाता अदिति के मुख से सुना था कि यज्ञभाग पाने के लिए स्वयं देवता ऐसा करेंगे, जिससे यह राजा धर्मपत्नी कहकर तुम्हें आदरपूर्वक स्वीकार करेगा। अतः अब यहाँ देर करना उचित नहीं, तब तक इस वृत्तान्त से प्रिय सखी शकुन्तला को ढाढ़स बँधाऊँ। (**ऐसा कहकर खिसक जाती है।**)

Maid—(With confusion) Your majesty! Please have courage! (be couragious) or let master take comfort.

***Miśrakeśī*—**Shall I even now make him happy or rather, I have heard from the mouth of mother of gods, as she was consoling Śakuntalā that the gods themselves, longing for their share at sacrifices, will so arrange that the husband will in a short period hail or accept his duly wedded wife. It is therefore improper to waste my time here or delay. In the mean while I console my dear friend with this news. *(Exit with a jump in the sky)*

(नेपथ्ये) भो ! अब्बह्मणं अब्बह्मणं। [**भोः ! अब्रह्मण्यम् अब्रह्मण्यम्।**]

राजा—(प्रत्यागतचेतनः कर्णं दत्त्वा) अये ! माधव्यस्येवार्त्तनादः।

चेटी—सो णाम माधव्वो तवस्सी पिंगलिआमिस्सिआहिं चेडिआहिं चित्तफल-अहत्थो पाविदो भवे। [**स नाम माधव्यस्तपस्वी पिङ्गलिकामिश्रिताभिश्चेटिकाभिश्चित्रफलक-हस्तः प्राप्तो भवेत्।**]

राजा—चतुरिके ! गच्छ, मद्वचनादनिषिद्धपरिजनां देवीमुपालभस्व।

(नेपथ्ये=जवनिकापृष्ठभागे (परोक्षे), भोः ! ब्रह्मणे साध्विति ब्रह्मण्यम्, न ब्रह्मण्यमित्य-ब्रह्मण्यम्=ब्राह्मणवधस्य पापजनकत्वादवध्योऽहम् इत्याशयः।

राजा—(प्रत्यागतचेतनः=पुनर्लब्धसंज्ञः, कर्णं दत्त्वा=ध्यानपूर्वकं श्रुत्वा) अये इति सम्भ्रमे, माधव्यस्येव=विदूषकस्येव, आर्त्तनादः=करुणक्रन्दनम् (आपन्नकरुणशब्दः)।

चेटी—नामेति सम्भावनायाम्। सः=मेघाच्छन्नप्रासादगतः, तपस्वी=अनुकम्पार्हः, माधव्यः=तन्नामकः विदूषकः, चित्रफलकं हस्ते यस्य सः चित्रफलकहस्तः=धृताङ्कितशकुन्तला-चित्रपट्टः (सन्), पिङ्गलिका=तदाख्या देव्या वसुमत्या दासी, तथा—मिश्रिताभिः=मिलिताभिः, पिङ्गलिकामिश्रिताभिः, चेटिकाभिः=अन्याभिर्दासीभिः, प्राप्तः=आक्रमितः, भवेत्।

राजा—चतुरिके ! गच्छ=याहि, मद्वचनात्=मम वचनमाश्रित्य, न निषिद्धः=दुर्व्यवहारात्र निवारितः, परिजनः=स्वपरिचारकलोकः, यया ताम् अनिषिद्धपरिजनाम्, देवीम्=महिषीम्, उपाल-भस्व=तिरस्कुरु। (तव परिचारिकाभिः माधव्योपरि ईदृशमन्याय्यमाचर्यते तत्र त्वया न किञ्चित् प्रतिविधीयते एष ते क आचार एवं मद्वचनमाश्रित्य देवीमुपालभस्व।)

(नेपथ्य में) अरे ! रे ! मैं अवध्य हूँ, अवध्य हूँ (बहुत बुरा, बहुत बुरा)।

राजा—**(होश में आकर, कान देकर)** अरे ! यह तो माधव्य का-सा करुण क्रन्दन है।

चेटी—मैं समझती हूँ, हाथ में शकुन्तला का चित्रफलक लिये हुए माधव्य पर पिङ्गलिका सहित अन्य दासियों ने आक्रमण किया है।

राजा—चतुरिके ! जाओ और मेरी ओर से रानी को उप.लम्भ दो कि उन्होंने अपनी दासियों को (आक्रमण करने से) रोका क्यों नहीं ?

(Behind the scenes) Oh! a crime against a Brāhmaṇa, a crime against a Brāhmaṇa.

The king—*(Coming to his senses and listening)* Oh! the cry of distress is like that of Mādhavya.

Maid—I guess, the Mādhavya, who was keeping in his hand the picture-board, was attacked by maid servants, including Piṅgalā.

The king—Caturike! go, and blame the queen on my behalf that why not she prohibited her servants from attacking on my friend Mādhavya.

(चेटी निष्क्रान्ता।)

(नेपथ्ये—भूयः स एव शब्दः)

राजा—परमार्थतो भीतिभिन्नस्वरो ब्राह्मणः। कः कोऽत्र भोः!

कञ्चुकी (प्रविश्य)—आज्ञापयतु देवः।

राजा—निरूप्यतां किमेवं माधव्यब्राह्मणः क्रन्दतीति।

कञ्चुकी—यावदवलोकयामि। (इति निष्क्रम्य ससम्भ्रमं पुनः प्रविष्टः)

राजा—पार्वतायन! न खलु किञ्चिदत्याहितम्।

(चेटी=दासी, निष्क्रान्ता=निर्गता)

(नेपथ्ये=परोक्षे, भूयः=पुनरपि, स एव=अब्रह्मण्यमिति, शब्दः=करुणक्रन्दनम्।)

राजा—परमार्थतः=यथार्थतः, भीत्या=भयेन, भिन्नः=स्वाभाविकेतरः, स्वरः=कण्ठध्वनिः, यस्य सः भीतिभिन्नस्वरः, ब्राह्मणः=माधव्यः, अत्र=अस्मिन् स्थाने, कः=कोऽस्ति, भो इति सम्बोधने।

कञ्चुकी—(प्रविश्य=आगत्य) आज्ञापयतु=निर्दिशतु, देवः=प्रभुः।

राजा—निरूप्यताम्=अवलोक्यताम्, किम्=कथम्, एवम्=अनेन रूपेण, माधव्य-ब्राह्मणः= माधव्यनामकः ब्राह्मणविदूषकः, क्रन्दति=आर्त्तनादं करोति, इति निरूप्यताम्=निश्चीय-ताम्।

कञ्चुकी—यावत्=यद्भूतम् तद्, अवलोकयामि=अवलोकनं करोमि। (इति=इत्युक्त्वा, निष्क्रम्य=बहिर्गत्वा, ससम्भ्रमम्=सोद्वेगम्, पुनः=भूयः, प्रविश्य=प्रवेशं विधाय)।

(दासी का प्रस्थान)

(नेपथ्य में पुनः वही शब्द)

राजा—निश्चय ही भय के कारण ब्राह्मण का स्वर विकृत हो गया है। अरे! है यहाँ कोई?

कञ्चुकी—(प्रवेश कर) महाराज! आज्ञा दीजिए।

राजा—देखो तो सही, क्या इस प्रकार माधव्य ब्राह्मण ही चीख रहा है?

कञ्चुकी—अभी जाकर देखता हूँ। **(जाकर और घबराहट के साथ पुनः प्रवेशकर)**

राजा—पार्वतायन! कुछ अधिक अनिष्ट तो नहीं हुआ?

(Female servant exits.)

(Behind the seenes—again the same sound appears.)

The king—Certainly, due to fear the voice of the Brāha-aṇa, became otherwise. Who is here?

Chamberlain—*(Entering)* What is the command, your majesty!

The king—Find out whether Mādhavya cries like this?

Chambarlain—I shall find out. *(Goes out and hastily entering again)*

कञ्चुकी—मैवम्।

राजा—ततः कुतोऽयं वेपथुः। तथा हि—

प्रागेव जरसा कम्पः सविशेषस्तु सम्प्रति।
आविष्करोति सर्वाङ्गमश्वत्थमिव मारुतः॥ २९॥

कञ्चुकी—परित्रायतां सुहृदं महाराजः।

राजा—पार्वतायन=कञ्चुकिन्! (पार्वतायन इति कञ्चुकिनो नामधेयम्) खल्विति प्रश्ने, न किञ्चिदत्याहितम्=न किमपि महाभयं जातम् (किम्?)।

कञ्चुकी—मैवम्=न किञ्चिदत्याहितमित्यर्थः।

राजा—ततः=तदा, अयं वेपथुः=तव गात्रोत्कम्पः, कुतः=कस्मात् कारणात् अस्तीति शेषः। तथाहि—

अन्वयः—जरसा प्रागेव कम्पः (आसीत्), सम्प्रति तु सविशेषः मारुतः अश्वत्थम् इव सर्वाङ्गम् आविष्करोति॥ २९॥

प्रागेवेति। जरसा=वार्द्धक्येन, प्रागेव=इतः पूर्वमेव, कम्पः=वेपथुः (आसीदिति शेषः), सम्प्रति=इदानीं तु, सविशेषः=अधिकः सन्, मारुतः=वायुः, अश्वत्थं=तन्नामकं (पिप्पलनामानं) वृक्षमिव, सर्वाङ्गम्=त्वदीयं सर्वावयवं प्राप्येति शेषः, आविष्करोति=सर्वावयवावच्छेदेनात्मानं प्रकाशयति। अत्रोपमालङ्कारः। पथ्यावक्त्रं वृत्तम्॥ २९॥

भावार्थः—यदि अत्याहितं नासीत् तर्हि कथम् ईदृशस्यागन्तुकस्य कम्पस्यावसरः इति भावः॥ २९॥

कञ्चुकी—परित्रायताम्=परिरक्षतु, सुहृदम्=स्वमित्रं माधव्यम्, महाराजः=भवान्।

कञ्चुकी—नहीं तो।

राजा—फिर भला तुम काँप क्यों रहे हो?

एक तो बुढ़ापे के कारण तुम पहले ही काँप रहे थे परन्तु अब वह काँपना और बढ़ गया है। जिस प्रकार वायु पीपल के समस्त अङ्गों में व्याप्त होकर अपना अस्तित्व प्रगट करता है, उसी प्रकार तुम्हारे अङ्गों में भी वह विशेषतः अपना अस्तित्व प्रगटा रहा है॥ २९॥

कञ्चुकी—महाराज! अपने मित्र को बचाइए।

The king—Parvatāyan! I think there is nothing to worry. (or not at all something very bad had happened)

Chamberlain—No, not at all.

The king—Then from where you have got this shaking? For—

Even before you were shaking due to old age but that shaking (trembleness) now increased somehow more. As the wind indicates its existence, spreading allover the Pīple tree (the holy fig tree) accordingly it discloses its existence in your limbs too.

Chamberlain—Let your majesty protect your friend.

राजा—कस्मात् परित्रातव्यः ?

कञ्चुकी—महतः कृच्छ्रात्।

राजा—अये! भिन्नार्थमभिधीयताम्।

कञ्चुकी—योऽसौ दिगवलोकनप्रासादो मेघप्रतिच्छन्नो नाम।

राजा—किन्तत्र ?

कञ्चुकी—

तस्याग्रभागाद् गृहनीलकण्ठैरनेकविश्रामविलङ्घ्यशृङ्गात्।
सखा प्रकाशेतरमूर्त्तिना ते केनापि सत्त्वेन निगृह्य नीतः॥ ३०॥

राजा—कस्मात्=किमभिधानात् पदार्थात् जनाद्वा, परित्रातव्यः=परिरक्षितव्यः ?

कञ्चुकी—महतः कृच्छ्रात्=प्रबलतमविपत्तेः।

राजा—अये इति विरक्तिसूचकं सम्बोधनम्, भिन्नः अर्थो यस्मिंस्तद्यथा स्यात्तथा भिन्नार्थम्=स्पष्टार्थम् (स्पष्टतरम्), अभिधीयताम्=सूच्यताम्।

कञ्चुकी—यः=दृश्यमानः, असौ=पूर्वोक्तः, दिगवलोकनप्रासादः=दिशामवलोकनाय निर्मितः प्रासादः=हर्म्यम्, मेघप्रतिच्छन्नो नाम=एतन्नामकः।

राजा—किन्तत्र=तत्र प्रासादे किमभूत् ?

कञ्चुकी—

अन्वयः—गृहनीलकण्ठैः अनेकविश्रामविलङ्घ्यशृङ्गात् तस्य अग्रभागात् प्रकाशेतरमूर्तिना केनापि सत्त्वेन ते सखा निगृह्य नीतः॥ ३०॥

राजा—किससे बचाऊँ ?

कञ्चुकी—भयानक विपत्ति से।

राजा—अरे! साफ-साफ कहो।

कञ्चुकी—यह जो चारों दिशाओं को देखने के लिए (शत्रु की गतिविधियों की जानकारी पाने के लिए) निर्मित मेघच्छत्र नामक महल है।

राजा—वहाँ क्या ?

कञ्चुकी—घर में पाले हुए मयूर जिसके शिखर पर अनेक बार विश्राम कर ही पहुँच पाते हैं उसी मेघच्छत्र प्रासाद के सर्वोच्च भाग से कोई अदृश्य आकार का जन्तु आपके मित्र को पकड़कर ले गया है॥ ३०॥

The king—From whom?

Chamberlain—From a great danger or calamity.

The king—Oh! tell me clearly.

Chamberlain—The palace Meghapratichanna by name, which is constructed to observe all the four directions (regions)....

The king—There what? (what happened there?)

Chamberlain—At the top of which (Meghapraticchanna palace) the house-tamed peacocks can reach even after taking rest

राजा—(सहसोत्थाय) आः, ममापि सत्त्वैरभिभूयन्ते गृहाः ? अथवा बहुप्रत्यवायं नृपत्वम्।

अहन्यहन्यात्मन एव तावज्ज्ञातुं प्रमादस्खलितं न शक्यम्।
प्रजासु कः केन पथा प्रयातीत्यशेषतः कस्य पुनः प्रभुत्वम्॥ ३१॥

तस्येति। गृहनीलकण्ठैः=प्रासादपालितमयूरैः, अनेकविश्रामैः=एकवारेणारोहणाय कुण्ठितसामर्थ्यात्, पुनः पुनः विश्रामकरणैः, विलङ्घ्यानि=अतिक्रमणीयानि, शृङ्गाणि=शिखराणि, यस्य तस्मात् अनेकविश्रामविलङ्घ्यशृङ्गात्, तस्य=मेघच्छन्नप्रासादस्य, अग्रभागात्=उपरित-नालिन्दात्, प्रकाशेतरा=अप्रकाशा (अलक्ष्या), मूर्त्तिर्यस्य तेन प्रकाशेतरमूर्त्तिना=प्रच्छन्नाकृतिना, केनापि=अदृश्येन, सत्त्वेन=रक्षःपिशाचादिजन्तुना, ते=तव, सखा=माधव्यः, निगृह्य=पराभूय सनिग्रहं धृत्वा, नीतः=अन्यस्थानं प्रापितः। अत्र पर्य्यायोक्तमलङ्कारः। उपजातिर्वृत्तम्॥ ३०॥

भावार्थः—दिगवलोकनाय निर्मितस्य अत्युच्चमेघच्छन्ननामकप्रासादस्य अग्रभागात् केनापि अदृश्यरक्षःपिशाचादिजन्तुना तव सखा माधव्यः निगृह्य अपहृतः, अन्यस्थानं प्रापितश्चेति भावः॥ ३०॥

राजा—(सहसोत्थाय=हठादासनादुत्थाय) आः इति क्रोधप्रदर्शने (इदं क्रोधसूचकम-व्ययम्), ममापि=दुष्यन्तस्यापि, गृहाः=प्रासादाः, सत्त्वैः=रक्षःपिशाचादिभिर्जन्तुभिः, अभिभूयन्ते= आक्रम्यन्ते। अथवा, बहवः=नानाविधाः, प्रत्यवायाः=विहितानुष्ठानलङ्घनजनितानि पापानि, यस्मिन् तत् बहुप्रत्यवायम्, नृपत्वम्=राजधर्म्मः (राजकार्य्यम्)।

अन्वयः—अहनि अहनि आत्मन एव तावत् प्रमादस्खलितं ज्ञातुं न शक्यम्। अथ पुनः प्रजासु कः केन पथा प्रयाति इति अशेषतः ज्ञातुं कस्य प्रभुत्वम् (अस्ति)॥ ३१॥

अहनीति। अहनि-अहनि=प्रतिदिनम्, आत्मन एव=स्वस्यैव, तावत्=साकल्येन, प्रमादेन=अनवधानतया, जातं स्खलितं=दुराचरणं (त्रुटितम्), ज्ञातुं=निर्णेतुम्, न शक्यम्, मादृशैर्नृपैरिति शेषः। अथ पुनः=किन्तु, प्रजासु=स्वराज्यवासिजनेषु (प्रकृतिषु), कः=जनः, केन= धर्म्मसम्मतेन तद्विपरीतेन वा, पथा=मार्गेण, प्रयाति=गच्छति (कः किमाचरतीत्यर्थः), इत्येतत्,

---

राजा—(सहसा उठकर) ओह! क्या हमारे घर भी दुष्ट जन्तुओं का आक्रमण होता है ? अथवा राजकार्य में प्रमादवश अनेक पाप होते ही हैं—

मानव प्रमादवश प्रतिदिन अनेकानेक त्रुटियाँ करता हुआ भी उन्हें नहीं जान पाता, इस स्थिति में कौन प्रजाजन किस मार्ग का अनुसरण कर रहा है इसे जानने की शक्ति भला किस (राजा) में हो सकती है ?॥ ३१॥

---

at several places, from there, some spirit of invisible form has taken away your friend, after having overpowered on him. (30)

The king—(Rising up hastily) Oh, even my house is infested by invisible evil spirits? Or rather—

It is not possible to know, in the first place, one's own slips through carelessness day after day. It there the power to ascertain fully as to who of my subjects goes by which path? (31)

(नेपथ्ये) अविधावेहि भो! अविधावेहि। **[अभिधाव भोः! अभिधाव।]**

राजा—(आकर्ण्य गतिभेदं रूपयन्) सखे! न भेतव्यं न भेतव्यम्।

(नेपथ्ये) भो कधं न भाइस्सं। एसो मं को वि पच्चामोडिअ सिरोधरं इक्खु विअ भग्गत्थि करिदुमिच्छदि। **[भोः! कथं न भेष्यामि। एष मां कोऽपि प्रत्यामोड्य शिरोधराम् इक्षुमिव भग्नास्थि कर्तुमिच्छति।]**

राजा—(सदृष्टिक्षेपम्) धनुर्धनुः।

अशेषतः=कात्स्न्येन, ज्ञातुम्=अवधारयितुम्, कस्य=नृपस्य, प्रभुत्वम्=शक्तिरस्ति? न कस्यापीत्यर्थः। अत्र अप्रस्तुतप्रशंसा अलङ्कारः, उपजातिर्वृत्तम्॥ ३१॥

भावार्थः—प्रतिदिनं स्वस्यैव प्रमादेन जातं स्खलितं ज्ञातुं न शक्यम्, अथ पुनः स्वराज्यवासिजनेषु कः जनेन केन न्यायेन अन्यायेन वा मार्गेण व्यवहरति प्रयाति वा इत्येतत् अशेषतः ज्ञातुं कस्य शक्तिरस्ति? (आत्मनः प्रमादस्खलनात् प्रजानामन्यायाचरणाद् वा समुद्भूतेन प्रत्यवायेनैव मद्गेहेऽपीदृशी सत्त्वबाधेति भावः)॥ ३१॥

(नेपथ्ये=परोक्षे) अभिधाव=मां लक्षीकृत्य द्रुतमायाहि। सम्भ्रमे द्विरुक्तिः। भोः इति सम्बोधने।

राजा—(आकर्ण्य=श्रुत्वा, गतिभेदं=धावनम्, निरूप्य=नाटयित्वा) सखे=मित्र माधव्य! न भेतव्यम्, न भेतव्यम्=भयं न कर्त्तव्यम्।

(नेपथ्ये=जवनिकापृष्ठभागे) भोः वयस्य! कथं न भेष्यामि=कथं भयं न करिष्यामि? एषः कोऽपि=अदृश्यजन्तुः, शिरोधराम्=ग्रीवाम्, प्रत्याामोड्य=पश्चाद् मोडयित्वा, मां=माधव्यम्, इक्षुम्=इक्षुदण्डमिव, भग्नास्थिं=खण्डितुम्, कर्त्तुमिच्छति=वाञ्छति।

राजा—(सदृष्टिक्षेपम्=विदूषकाह्वानदिशि दृष्टिपातपूर्वकम्) धनुर्धनुः आनय इति। क्रोधे द्विरुक्तिः।

(नेपथ्य में) अरे! मेरी ओर आओ! मेरी ओर आओ।

राजा—(सुनकर शीघ्र चलने का अभिनय करते हुए) मित्र! मत डरो, मत डरो।

(नेपथ्य में) अरे! डरूँ कैसे नहीं। यह कोई जन्तु मेरी गर्दन गन्ने की तरह मरोड़कर हड्डियों को चूर-चूर कर देना चाहता है।

राजा—(दृष्टिपातपूर्वक) धनुष लाओ धनुष।

(Behind the scenes) come (approach) towards me, come towards me.

The king—*(Walking round with an altered gait)* Friend! fear not, fear not.

(Behind the scenes) How shall I not fear? Here some one is crushing me (breaking me into three/having three folds) like a sugarcane, with my neck bent backwards.

The king—*(Casting a glance)* Just my bow.

प्रतीहारी—(प्रविश्य धनुर्हस्ता) जअदु जअदु भट्टा। एदं ससरं सरासणं हत्थावारओ अ। [**जयतु जयतु भर्त्ता। एतत् सशरं शरासनं हस्तावारकश्च।**]

(राजा सशरं धनुरादत्ते।)

(नेपथ्ये)

एष त्वामभिनवकण्ठशोणितार्थी शार्दूलः पशुमिव हन्मि चेष्टमानम्।
आर्त्तानां भयमपनेतुमात्तधन्वा दुष्यन्तस्तव शरणं भवत्विदानीम्॥ ३२॥

प्रतिहारी—(प्रविश्य=प्रवेशं विधाय, धनुः हस्ते यस्याः सा धनुर्हस्ता, प्रतीहारी=द्वार-रक्षिका) भर्त्ता= प्रभुः, जयतु जयतु=अस्मत् स्वामिनो विजयोऽस्तु। एतत्=प्रस्तुतं, सशरं=बाण-सहितम्, शरासनम्=धनुः, हस्तं=पाणिम्, आवृणोति=ज्याघातनिवारणायाच्छादयतीति सः हस्ता-वारकः, च।

(राजा सशरं=बाणसहितम्, धनुः=चापम्, आदत्ते=गृह्णाति।)

(नेपथ्ये=जवनिकापृष्ठभागे)

अन्वयः—अभिनवकण्ठशोणितार्थी एषः शार्दूलः पशुमिव चेष्टमानं त्वां हन्मि, आर्त्तानां भयम् अपनेतुम् आत्तधन्वा दुष्यन्तः इदानीं तव शरणं भवतु॥ ३२॥

एष इति। अभिनवं=सद्यो निःसरणात् नूतनम्, कण्ठशोणितम्=गलरक्तं, अर्थयति=काम-यते, इति सः अभिनवकण्ठशोणितार्थी, एषः= अहम्, शार्दूलः=व्याघ्रः, पशुं=मृगादिजन्तुमिव, चेष्टमानम्=आत्मरक्षणाय पलायितुं यतमानम्, त्वाम्, हन्मि=नाशयामि, आर्तानाम्=पीडितानाम्, भयम्, अपनेतुं=दूरीकर्त्तुम्, आत्तं=गृहीतं, धनुर्येन सः आत्तधन्वा, दुष्यन्तः, इदानीम्=सम्प्रति, तव शरणं=रक्षको भवतु (तस्य सामर्थ्यमस्ति चेत् स रक्षतु।) अत्र श्रौतोपमालङ्कारः, प्रहर्षिणी वृत्तम्॥ ३२॥

भावार्थः—अभिनवकण्ठशोणितार्थी अहं शार्दूलः मृगादिजन्तुमिव आत्मरक्षणाय पलायितुं यतमानं त्वां नाशयामि। यदि चेत् शक्तिः तदा पीडितानां भयमपनेतुम् आत्तधन्वा दुष्यन्तः त्वां रक्षतु॥ ३२॥

प्रतीहारी—(हाथ में धनुष लिये हुए आती है) स्वामी की जय हो। यह धनुष-बाण और हस्तावरण प्रस्तुत हैं।

(राजा धनुष-बाण लेता है।)

(नेपथ्य में) कण्ठ का ताजा खून पीने की इच्छा रखने वाले सिंह की भाँति मैं तुझे आत्मरक्षणार्थ छटपटाते हुए पशु की भाँति मार डालूँगा। दुखियों का भय दूर करने के लिए धनुष धारण करने वाले दुष्यन्त में सामर्थ्य हो तो तुझे बचा लें॥ ३२॥

Door-keeper—*(Entering, bow in hand)* Master! here is your bow, arrow along with the handguard.

(The king takes the bow with arrows)

(Behind the scenes) Here, thirsting for fresh blood from the throat, I kill you struggling, like a tiger a beast. let Duśyanta, who has taken up his bow to remove the fear of the distressed, be your protector now. (32)

राजा—(सरोषम्) कथं मामेवोद्दिशति। आः, तिष्ठ तिष्ठ, कौणपापसद! त्वमिदानीं न भवसि। (चापमारोप्य) पार्वतायन! सोपानमार्गमादेशय।

कञ्चुकी—इत इतो देवः।

(सर्वे सत्वरमुपसर्पन्ति)

राजा—(समन्तादवलोक्य) अये! शून्यं खल्विदम्।

(नेपथ्ये) भो! परित्ताआहि परित्ताआहि। अहं तुमं पेक्खामि, तुमं मं ण पेक्खसि। मज्जारगहिदो उंदुरु विअ णिरासोम्हि जीविदे। **[भोः! परित्रायस्व परित्रायस्व। अहं त्वां प्रेक्षे, त्वं मां न प्रेक्षसे। मार्जारगृहीत उन्दुरुरिव निराशोऽस्मि जीविते।]**

राजा—(सरोषम्=सकोपम्) कथम्=किम्, मामेव=दुष्यन्तमेव, उद्दिशति=लक्षीकृत्य वदति। आः इति क्रोधातिशये, तिष्ठ-तिष्ठ=स्थिरीभव, द्विरुक्तिः वीप्सारोषावेगं सूचयति, कुणपं=शवम्, अदन्तीति कौणपाः=क्रव्यादादयः, तेष्वपसीदति=पश्चात् वर्त्तत, इति सः कौणपापसद= हे राक्षसाधम! त्वम्, इदानीम्=सम्प्रति, न भवसि=न मे लक्ष्यं भवसि इति काक्वा प्रश्नः (इदानीं त्वं मे लक्ष्यमेव भवसीत्यर्थः) अद्यैव त्वां हन्मि। (चापमारोप्य) पार्वतायन=कञ्चुकीय! सोपानमार्गम्=मेघप्रतिच्छन्नप्रासादारोहणमार्गम्, आदेशय=दर्शयतु।

कञ्चुकी—इत इतो देवः=पुरोवर्त्तिनानेनानेन मार्गेण देव! आरोहतु।

(सर्वे मञ्चस्थिता जनाः, सत्वरम्=शीघ्रम्, उपसर्पन्ति=आरोहणं नाटयन्ति।)

राजा—(समन्ताद्=इतस्ततः, अवलोक्य=दृष्टिनिक्षेपं विधाय) अये इत्याश्चर्ये, इदं=स्थानम्, शून्यम्=सत्त्वरहितम्।

(नेपथ्ये=परोक्षे) भोः! परित्रायस्व परित्रायस्व=मां रक्ष, रक्ष। अहं, त्वाम्=भवन्तम्,

---

राजा—(क्रोधपूर्वक) क्या (यह) मुझे ही लक्ष्य करके कह रहा है? आः राक्षसाधम! ठहर, ठहर, मैं अभी तुझे समाप्त किये देता हूँ। **(धनुष चढ़ाकर)** पार्वतायन! सीढ़ी का मार्ग बताओ।

कञ्चुकी—महाराज! इधर आइए इधर।

(सब तेजी से बढ़ते हैं)

राजा—(चारों ओर देखकर) अरे! यह तो सर्वथा खाली है (यहाँ तो कोई भी नहीं है।)

(नेपथ्य में) मित्र! मेरी रक्षा करो, मेरी रक्षा करो। मैं तो तुम्हें देख रहा हूँ, क्या तुम मुझे नहीं देखते? बिल्ली द्वारा पकड़े गये चूहे की भाँति मैं तो जीवन से निराश हो गया हूँ।

The king—*(With rage)* How! it alludes to even me. Stay, eater of corpses! you will not be now. *(Stringing the bow)* Parvatāyana! show the way to the stair-case.

Chamberlain—This way, this way, may your majesty move.

(All approach hastily)

The king—*(Looking around)* This is indeed vacant.

(Behind the scenes) O' friend save me, save me. alas! Alas! I

राजा—भोस्तिरस्करिणीगर्वित! मदीयमस्त्रमपि त्वां न पश्यति? स्थिरो भव, मा च ते वयस्यसम्पर्काद्विश्वासोऽभूत्। एष तमिषुं सन्दधे—

यो हनिष्यति वध्यं त्वां रक्ष्यं रक्षिष्यति द्विजम्।
हंसो हि क्षीरमादत्ते तन्मिश्रा वर्जयत्यपः॥ ३३॥

(इति शस्त्रं सन्धत्ते)

प्रेक्षे=अवलोकयामि, त्वम्=भवान्, मां, न प्रेक्षसे=न द्रष्टुं समर्थोऽसि। मार्जारगृहीतः=बिडालाक्रान्तः, उन्दुरुरिव=मूषिक इव, जीविते=जीवने, निराशोऽस्मि=निष्प्रत्याशोऽस्मि।

राजा—भोः! तिरस्करिण्या=अदृश्यकारिणीविद्यया, गर्वितः=साहङ्कारः (तिरस्करिणी-विद्याप्रभावात् अहमेव सर्वं पश्यामि न कोऽपि मामिति सञ्जातगर्वः), मदीयम्=मामकीनम्, अस्त्रम्=बाणमपि, त्वाम्, न पश्यति=नावलोकयति (काक्वा पश्यत्येवेत्यर्थः)। स्थिरो भव= स्वस्थाने एव तिष्ठ, ते=तव मनसि, वयस्यसम्पर्कात्=माधव्येन संयोगात्, विश्वासः=माधव्याङ्गेषु पतनसम्भावनया दुष्यन्तो बाणं निक्षेप्तुं न शक्ष्यतीति प्रत्ययः, मा भूत्=न भवतु। एषः=अहम्, तं=तथाविधम्, इषुं=बाणं, सन्दधे=योजयामि।

अन्वयः—यः वध्यं त्वां हनिष्यति रक्ष्यं द्विजं रक्षिष्यति। हि हंसः क्षीरम् आदत्ते तन्मिश्राः अपः वर्जयति॥ ३३॥

य इति। यः=इषुः, वध्यं=वधार्हम्, त्वाम्, हनिष्यति=प्रहरिष्यति, तथा रक्ष्यं=रक्षायोग्यम्, द्विजम्=ब्राह्मणम्, रक्षिष्यति (तमिषुं सन्दधे), हि=तथाहि, हंसः=सरस्वतीवाहनभूतः पक्षिविशेषः, क्षीरं=दुग्धम्, आदत्ते=जलमध्यात् गृह्णाति, किन्तु तन्मिश्राः=क्षीरसम्पृक्ताः, अपः=जलानि, वर्जयति= त्यजति, स्वभाव एवायं तस्येति भावः। अत्र दृष्टान्तोऽलङ्कारः। पथ्यावक्त्रं वृत्तम्॥ ३३॥

भावार्थः—यथा हंसः क्षीरमिश्रितजलानि वर्जयित्वा मात्रं क्षीरमेव गृह्णाति तथैव मदीय-बाणोऽपि वध्यं त्वामेव हनिष्यति न तु रक्ष्यं माधव्यमिति भावः॥ ३३॥

(इति=इत्युक्त्वा, शस्त्रं=बाणं, सन्धत्ते=योजयति धनुषि)

राजा—ओ तिरस्करिणी विद्या के कारण गर्वित! क्या मेरा अस्त्र भी तुम्हें नहीं देख सकेगा। ठहरो! मित्र के शरीर का स्पर्श पा लेने के कारण तुम बच जाओगे, तुम्हें यह विश्वास न हो जाय, अतः मैं ऐसा बाण चढ़ाता हूँ—

जो मारने योग्य तुझे मार डालेगा और रक्षणीय ब्राह्मण को बचा देगा, जैसे हंस दूध और जल मिले हुए पात्र में से दूध ले लेता है और जल को त्याग देता है॥ ३३॥

(ऐसा कहकर बाण चढ़ाता है।)

---

see your majesty, you see me not. Like a mouse seized by a cat, I have become hopeless of my life.

The king—Oh, you proud of your veil of invisibility. If not I, my weapon will see you. Here I fix that arrow—

Which will kill you, who deserve to be killed, and protect the Brāhamaṇa, who is worthy of protection. For the swan takes up milk and rejects the water mixed up with it. (33)

(ततः प्रविशति मातलिर्विदूषकश्च)

मातलिः—आयुष्मन्!

कृताः शरव्यं हरिणा तवासुराः शरासनं तेषु विकृष्यतामिदम्।
प्रसादसौम्यानि सतां सुहृज्जने पतन्ति चक्षूंषि न दारुणाः शराः ॥ ३४॥

राजा—(ससम्भ्रममस्त्रमुपसंहरन्) अये मातलिः! स्वागतं देवराजसारथेः।

विदूषकः—भो मणस्सि! इमिणा अहं पशुमारणं मारिदुं पाविदो, भवं उण इमं साअदेण अहिणंददि। **[भो मनस्विन्! अनेनाहं पशुमारणं मारयितुं प्राप्तः, भवान् पुनरिमं स्वागतेनाभिनन्दति।]**

(ततः=तदनन्तरम्, मातलिः=इन्द्रसारथिः विदूषकश्च प्रविशति।)

मातलिः—आयुष्मन्!

अन्वयः—हरिणा असुराः तव शरव्यं कृताः इदं शरासनं तेषु विकृष्यताम्। (यतः) सुहृज्जने सतां प्रसादसौम्यानि चक्षुषि पतन्ति दारुणाः शराः न पतन्ति॥ ३४॥

कृता इति। हरिणा=इन्द्रेण, असुराः=दानवाः, तव=भवतः, शरव्यं=शरमोक्षणलक्ष्यं, कृताः= विहिताः, (अतः) इदं=शरासनं धनुः, तेषु=असुरेषु, विकृष्यताम्=आकृष्यताम् (न तु मयीति भावः), यतः सुहृज्जने=मित्रजने, सत्तां=सज्जनानाम् (प्रशस्तपुरुषाणाम्), प्रसादेन=प्रसन्नतया, सौम्यानि=सुन्दराणि, प्रसादसौम्यानि, चक्षुषि=नयने, पतन्ति, दारुणाः=भीषणाः, शराः न पतन्ति। अत्र परिसंख्या काव्यलिङ्गमलङ्कारश्च। वंशस्थविलं वृत्तम्॥ ३४॥

भावार्थः—इन्द्रेण निखिलानामसुराणां विनाशं प्रतिपादयितुम् एकेनैव शरपातेन शरव्यमित्येकत्वं कृतम्। अतः संहितमपि शरमुपसंहृत्य सप्रसादं चक्षुरेव मयि पातयेत्याशयः॥ ३४॥

राजा—(ससम्भ्रम्=सोद्वेगम्, अस्त्रं=बाणं, उपसंहरन्=उपयोजयन्) अये इति विस्मये, मातलिः, देवराजसारथेः=इन्द्रसूतस्य, स्वागतम्=शुभागमनं भवतु।

(इसके बाद मातलि और विदूषक का प्रवेश)

मातलि—आयुष्मन्!

देवराज इन्द्र ने असुरों को आपके बाण का लक्ष्य निर्दिष्ट कर दिया है। अतः आप उन असुरों पर ही धनुष चढ़ायें। सज्जन लोग अपने बन्धुओं पर प्रसाद-सौम्य दृष्टिपात ही किया करते हैं, भयानक बाणों का सन्धान नहीं करते॥ ३४॥

राजा—**(घबराहट के साथ, बाण धनुष से उतारता हुआ)** अरे मातलि! देवराज के सारथी! आपका स्वागत है।

(Aims the missile i.e. arrow)

(Then enter Mātalī and viduśaka)

Mātalī—O' Longlived one!

The mamons have been made your target by the lord of gods i.e. Indra. Let this bow be drawn against them. Of the good, on friendly people, fall eyes, soft with fevour, not dreadful arrows.

The king—(Hastily, with drawing the arrow) Oh, Mātalī, welcome Mahendra's charioteer!

मातलिः—(सस्मितम्) आयुष्मन्! श्रूयतां यदर्थमस्मि हरिणा भवत्सकाशं प्रेषितः।

राजा—अवहितोऽस्मि।

मातलिः—अस्ति कालनेमिप्रसूतिर्दुर्ज्जयो नाम दानवगणः।

राजा—अस्ति, श्रुतपूर्वो मया नारदात्।

मातलिः—

सख्युस्ते स किल शतक्रतोरवध्यस्तस्य त्वं रणशिरसि स्मृतो निहन्ता।
उच्छेत्तुं प्रभवति यन्न सप्तसप्तिस्तन्नैशं तिमिरमपाकरोति चन्द्रः॥ ३५॥

विदूषकः—भो मनस्विन्!=प्रशस्तमना! अनेन=मातलिना, अहम्=विदूषकः, पशोर्मारण-मिव मारणं यस्मिन् कर्मणि तद् यथा स्यात्तथा पशुमारणं, मारयितुम्=हन्तुम्, प्राप्तः= गृहीतः, भवान्=त्वम्, पुनः=भूयः, इमं=जनम्, स्वागतेन=स्वागतप्रश्नेन, अभिनन्दति=आद्रियते। इदं ते महदनुचिंतमिति भावः।

मातलिः—(सस्मितम्=सेषद्धासम्) आयुष्मन्! श्रूयताम्=आकर्ण्यताम् (अवधार्यताम्), यदर्थम्=येन उद्देश्येन, हरिणा=इन्द्रेण, (अहम्) भवत्सकाशं=भवत्पार्श्वे (सन्निधौ), प्रेषितः अस्मि।

राजा—अवहितोऽस्मि=कृतावधानोऽस्मि।

मातलिः—कालनेमिः तदाख्यासुरः, तस्य प्रसूतिः=सन्ततिः, दुःखेन जीयत इति दुर्जयः= जेतुमशक्यः, नाम=तन्नामकः, दानवगणः=दानवसमुदायः, अस्ति=विद्यते।

राजा—(स दानवगणः मया, नारदात्=देवर्षेः सकाशात्, श्रुतपूर्वः=मया पूर्वं श्रुत इत्यर्थः।

विदूषक—ओ मनस्वी! यह मुझे पशु की मौत मारना चाहता था और आप इसका स्वागतपूर्वक अभिनन्दन कर रहे हैं।

मातलि—आयुष्मन्! मुझे जिस कार्य के लिए इन्द्र ने आपके पास भेजा है, उसे सुनिये।

राजा—मैं सावधान हूँ (ध्यानपूर्वक सुन रहा हूँ)।

मातलि—कालनेमि की सन्तान दुर्जय नामक एक राक्षसों का समुदाय है।

राजा—हाँ, मैंने नारद से सुना है।

मातलि—वह दानव-समुदाय क्योंकि तुम्हारे मित्र इन्द्र के लिए अवध्य है अतः संग्राम में आप ही उनका वध कर सकेंगे ऐसा देवराज का विचार है। क्योंकि सूर्य जिस

Jester—He, by whom I was about to be killed in the manner of sacrificial animal, is being greated by you with a welcome.

Mātalī—*(With a smile)* Long-lived one! hear, why I am sent to your presence by Indra.

The king—I am attentive.

Mātali—There is a group of demons, called Durjaya, the progeny of Kālanemi.

The king—There is, this has been heard by me from Nārada.

स भवानात्तशस्त्र एवेदानीं देवरथमारुह्य विजयाय प्रतिष्ठताम्।

राजा—अनुगृहीतोऽस्मि अनया मघवतः सम्भावनया। अथ माधव्यम्प्रति भवता किमेवं प्रयुक्तम्।

मातलिः—

अन्वयः—सः किल ते सख्युः शतक्रतोः अवध्यः रणशिरसि त्वं तस्य निहन्ता स्मृतः। सप्तसप्तिः नैशं यत् तिमिरम् उच्छेत्तुं न प्रभवति तत् चन्द्रः अपाकरोति॥ ३५॥

सख्युरिति। सः=दानवगणः, किलेति प्रसिद्धौ, ते=तव, सख्युः इन्द्रस्य, अवध्यः=कुतोऽपि कारणाद् हन्तुमशक्यः, (अतः) रणशिरसि=युद्धाग्रे, त्वम्=दुष्यन्तः, तस्य=दानवगणस्य, निहन्ता=विनाशकर्त्ता, स्मृतः=शतक्रतुनैव निर्णीतः। सप्त सप्तयः=अश्वाः, यस्य सः सप्तसप्तिः=सप्ताश्ववाहनः सूर्यः, नैशम्=निशाभवम्, यत् तिमिरम्=अन्धकारम्, उच्छेत्तुं=नाशयितुम्, न प्रभवति=न शक्नोति, तत्=तिमिरम्, चन्द्रः=निशाकरः, अपाकरोति=विध्वंसयति (दूरीकरोति)। अत्र दृष्टान्तोऽलङ्कारः। प्रहर्षिणी वृत्तम्॥ ३५॥

भावार्थः—तद्दानवगणस्येन्द्रवध्यत्वेऽपि त्वमेव तद्दानवगणस्य विनाशं कर्त्ता स्वयं शतक्रतुनैव निर्णीतः। यथा नैशतमसः सूर्याविनाश्यत्वेऽपि चन्द्रविनाश्यत्वं स्वयं विधात्रा एव निर्णीतः॥ ३५॥

सः=पूर्वोक्तः इन्द्रसखा, भवान्=त्वम्, आत्तशस्त्रः=गृहीतायुध एव, देवरथम्=इन्द्रस्यन्दनम्, आरुह्य=आरोहणं कृत्वा, विजयाय=विजेतुम्, प्रतिष्ठताम्=गच्छतु।

राजा—मघवतः=इन्द्रस्य, अनया=भवदुक्तया, सम्भावनया=बहुमत्या, अनुगृहीतोऽस्मि=कृतकृत्योऽस्मि। अथ इति प्रश्ने, माधव्यम्प्रति=मम वयस्यं विदूषकम्प्रति, भवता=त्वया, एवम्=अनेन प्रकारेण, किम्=कथम्, प्रयुक्तम्=आचरितम्।

अन्धकार को नष्ट कर पाने में समर्थ नहीं होता, उस रात्रिकालीन अन्धकार को चन्द्रमा नष्ट कर दिया करता है॥ ३५॥

अतः आप अभी अपने शस्त्रों को लेकर देवरथ पर सवार होकर विजययात्रार्थ प्रस्थान करें।

राजा—देवराज के इस सम्मान से मैं अनुगृहीत हुआ। किन्तु माधव्य के प्रति आपने ऐसा व्यवहार क्यों किया?

***Mātali*—**That (group of demons) they say, is impossible to be conquered by Indra, your friend; but you are distined to be its destroyer at the head of the war. The nocturnal (pertaining to night) darkness, which the sun is not able to destroy, the moon removes. (35)

Let that self of yours, even with the weapon taken up, start for victory, having mounted that chariot of Indra.

***The king*—**I am favoured by this honour of Indra. Well, why was it thus performed by you with refrence to Mādhavya?

मातलिः—(सस्मितम्) तदपि कथ्यते। किञ्चिन्निमित्तादपि मनःसन्तापादायुष्मान् मया विकृतो दृष्टः, पश्चात् कोपयितुमायुष्मन्तं तथा कृतवानस्मि। कुतः—

ज्वलति चलितेन्धनोऽग्निर्विप्रकृतः पन्नगः फणां कुरुते।
तेजस्वी संक्षोभात् प्रायः प्रतिपद्यते तेजः॥ ३६॥

राजा—युक्तमनुष्ठितं भवद्भिः। (विदूषकं प्रति) वयस्य! अनतिक्रमणीया दिवस्पते-राज्ञा, तद्गच्छ परिगतार्थं कृत्वा मद्वचनादमात्यपिशुनं ब्रूहि।

मातलिः—(सस्मितम्=सेषद्धासम्) तदपि कथ्यते=माधव्यपीडनघटनाया कारणं मया निवेद्यते, किञ्चित्=अस्माभिरज्ञातं किमपि, निमित्तं=कारणं, यस्य सः तस्मात् किञ्चिन्निमित्तादपि, मनःसन्तापात्=मनस्तापात्, आयुष्मान्=भवान्, मया=मातलिना, विकृतः=अधीरः (अस्वभावस्थ इव), दृष्टः=अवलोकितः, पश्चात्=अस्वभावस्थत्वदर्शनानन्तरम्, आयुष्मन्तम्=भवन्तम्, कोपायितुम्=कोपाविष्टं कर्त्तुम्, तथा=माधव्यग्रीवापीडनम्, कृतवान् असि=मयानुष्ठितम्। कुतः= कोपाधाने हेतुं दर्शयति—

अन्वयः—अग्निः चलितेन्धनः ज्वलति तथा पन्नगः विप्रकृतः फणां कुरुते। (एवं) तेजस्वी संक्षोभात् प्रायः तेजः प्रतिपद्यते॥ ३६॥

ज्वलतीति। अग्निः=वह्निः (दाह्याभावतया निर्वाणप्रायोऽपीति शेषः), चलितं=प्राप्तचलनम्, चुल्यादौ पुनर्निक्षेपात्सञ्चरितम्, इन्धनं=काष्ठं, यस्मिन् सः चलितेन्धनः सन्, ज्वलति=पुनर्दीप्यते, तथा पन्नगः=सर्पः, विप्रकृतः=केनाप्युद्वेजितः सन्, फणां कुरुते=फणोत्तोलनपूर्वकम्, स्वपराक्रममा-विष्करोति। (एवमेव) तेजस्वी=तेजःसम्पन्नः पुरुषः, संक्षोभात्=सम्यक् क्षोभम्=उत्तेजनां प्राप्य, प्रायः=बाहुल्येन, तेजः=स्वकीयं पराक्रमम्, प्रतिपद्यते=आसादयति. आविष्करोति। अत्र अप्रस्तुत-प्रशंसा दृष्टान्तश्चालङ्कारौ, आर्य्या जातिः॥ ३६॥

भावार्थः—यथा वह्निः काष्ठादिचालनेन पुनर्दीप्यते, तथा उद्वेजितसर्पः फणोत्तोलनपूर्वकं स्वपराक्रमं फूत्कारव्याजेनाविष्करोति तथैव तेजस्वी पुरुषः संक्षोभादेव प्रायः स्वकीयं पराक्रमम् आविष्करोति। ते प्रियवयस्यस्य उत्पीडनरूपां पीडां प्राप्य त्वमपि आगन्तुकसन्तापादित्यागपूर्वकं पुनः पूर्वतेजं प्राप्तवानित्याशयः॥ ३६॥

मातलि—(मुस्कराकर) यह भी बताता हूँ। किसी कारणवश मैंने आपको शोकाकुल देखा था। अतः आपको उत्तेजित करने के लिए ही मैंने ऐसा किया था। क्योंकि—

लकड़ियों को इधर-उधर करने से आग धधकती है तथा छेड़ने पर साँप अपना फन फैलाकर फूत्कारता है, वैसे ही तेजस्वी जन भी उत्तेजना पाने पर ही प्रायः अपना तेज प्रगट करते हैं॥ ३६॥

Mātali—That also is told. The long-lived one was seen by me in a distressed condition owing to mental affliction of a certain cause. I acted in that manner. Why—

Fire burn up brightly when the fuel is stirred. the snake when offended expands its hood. For, usually people attain their proper greatness through provocation. (36)

त्वन्मतिः केवला तावत् प्रतिपालयतु प्रजाः।
अधिज्यमिदमन्यस्मिन् कर्म्मणि व्यापृतं धनुः॥ ३७॥

विदूषकः—जं भवं आणवेदि। [**यद्भवानाज्ञापयति।**] (इति निष्क्रान्तः)

मातलिः—आयुष्मान् रथमारोहतु।

राजा—तथा करोति।

(इति निष्क्रान्ताः सर्वे)

इति षष्ठोऽङ्कः।

राजा—भवद्भिः=त्वया, युक्तम्=उचितम्, अनुष्ठितम्=आचरितम्। (विदूषकं प्रति=विदूषकमुद्दिश्य) दिवस्पतेः=स्वर्गाधीश्वरस्य, इन्द्रस्य,आज्ञा, अनतिक्रमणीया=अनवहेलनीया, तद्=तस्मात्, गच्छ, परिगतः=परिज्ञातः, अर्थः=अयं वृत्तान्तः, येन तं परिगतार्थम्, कृत्वा=विधाय (एतद्वृत्तान्ताभिज्ञं कृत्वा), मद्=दुष्यन्तस्य, वचनात्=वाक्यात्, अमात्यम्=मन्त्रिणम्, पिशुनम्=पिशुननामधेयं, ब्रूहि=कथय—

अन्वयः—केवला त्वन्मतिः प्रजाः तावत् प्रतिपालयतु, अधिज्यम् इदं धनुः अन्यस्मिन् कर्मणि व्यापृतम्॥ ३७॥

त्वन्मतिरिति। केवला=एकाकिनी, त्वन्मतिः=तव बुद्धिः, प्रजाः=मदीयराज्यस्थान् जनान्, तावत्=मत्प्रत्यागमनपर्यन्तम्, प्रतिपालयतु=परिरक्षतु, अध्यारूढा ज्या यत्र तत् अधिज्यम्=युक्तमौर्वीकम्, इदं=मदीयम्, धनुः, अन्यस्मिन् कर्मणि=दुर्जयदानवगणहनने, व्यापृतम्=नियुक्तम्। अत्र काव्यलिङ्गमलङ्कारः॥ ३७॥

भावार्थः—यतः दिवस्पते राज्ञा अनतिक्रमणीया अतः मदीयं धनुः दुर्जयदानवगणहनने नियुक्तम्, मत्प्रत्यागमनपर्यन्तम् एकाकिनी तव बुद्धिरेव प्रजाः प्रतिपालयतु॥ ३७॥

विदूषकः—यत्=यथा, भवान्=त्वम्, आज्ञापयति। (इति=इत्युक्त्वा, निष्क्रान्तः=निर्गतः।)

राजा—आपने ठीक ही किया। **(विदूषक से)** इन्द्र की आज्ञा टाली नहीं जा सकती। अतः जाओ, यह सब वृत्तान्त सुनाकर हमारी ओर से सचिव पिशुन से कहो—

'अब कुछ समय तक केवल आपकी बुद्धि ही प्रजा का पालन करे। प्रत्यञ्चायुक्त मेरा यह धनुष अब दूसरे कार्य में लग रहा है॥ ३७॥

विदूषक—जैसी महाराज की आज्ञा।

The king—Well done (by you). *(Towards jester)* The command of the lord of heaven is not to be transgressed. Therefore, making him acquainted with facts in this matter, say thus to minister Piśuna "Let your intelligence alone protect the subjects for a certain period. This strung bow is engaged in another work." (37)

Jester—As your majesty commands.

मातलिः—आयुष्मान्, रथम्=देवयानम्, आरोहतु=आरोहणं करोतु।
राजा—तथा करोति=रथमारोहति।

(इति=एवं वृत्ते सति, सर्वे=दुष्यन्तादयः, निष्क्रान्ताः।)

इति षष्ठोऽङ्कः।

मातलि—आयुष्मान्! आप रथ पर आरूढ़ हों।
राजा—वैसा ही करता है **(रथ पर बैठता है)**

(सबका प्रस्थान)।

षष्ठ अङ्क समाप्त।

Mātali—Let the long-lived one mount the chariot.
The king—*(gesticulates ascending the chariot.)*

(Exeunt All.)

'END OF ACT VI'